संस्कृतग्रन्थमाला - ८६
In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

श्रीदुरिशेटि वेङ्कटरामाचार्य सौपर्णः

प्रधानसम्पादकः
आचार्य टि. केशवनारायणो वेदालङ्कारः
निदेशकः

सम्पादकौ
डा.वी.श्रीनिवाससशर्मा
संयुक्तनिदेशकः एवं सम्पादकः

डा. सन्तोषकुमारः जोषी
सहायसंशोधकः

संस्कृतपरिषद्
(आदर्शशोधसंस्था नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन मानिता)
उस्मानिया विश्वविद्यालयः
हैदराबाद् - ५०० ००७
२०११

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतग्रन्थमाला -86

शिल्पश्रीः

श्रीदुरिशेटि वेङ्कटरामाचार्य सौपर्णः

प्रधानसम्पादकः

आचार्य टि. केशवनारायणो वेदालङ्कारः

निदेशकः

सम्पादकौ

डा.वी.श्रीनिवासशर्मा

संयुक्तनिदेशकः एवं सम्पादकः

डा.सन्तोषकुमारः जोषी

सहायसंशोधकः

संस्कृतपरिषद्

(आदर्शशोधसंस्था नवदेहलीस्थ राष्ट्रियसंस्कृतसंस्थानेन मानिता)

उस्मानिया विश्वविद्यालयः,

हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतग्रन्थमाला-86

शिल्पश्रीः
श्रीदुरिशेटि वेङ्कटरामाचार्य सौपर्णः

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः।

मुद्रितप्रतयः - 300

मूल्यम्- 60 रूप्यकाणि

सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः।

आर् के मुद्रणालयः,
नाम्पल्ली, हैदराबाद्.

प्राप्तिस्थानम्-
संस्कृतपरिषद्
(आदर्शशोधसंस्था)
नवदेहलीस्थ राष्ट्रियसंस्कृतसंस्थानेन मानिता
उस्मानिया विश्वविद्यालयः, हैदराबाद् -500007,
दूरवाणी-040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-86

SILPASREE

SRI DURISETI VENKATARAMACHARYA SAUPARNA

General Editor
Prof. T. Keshavanarayana Vedalankar
Director

Edited by
Dr. V. Srinivasa sarma
Joint Director cum Editor

And

Dr. Santosh kumar Joshi
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha samstha)
Recognised by Rashtriya Sanskrit Sansthan, Newdelhi
Osmania University, Hyderabad-07
Phone&Fax 040-27070281

2011

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-86

SHILPASREE

SRI DURISETI VENKATA RAMACHARYA SAUPARNA

ISBN –

Copies – 300

Price - Rs.50/-

Printed at-
R K Printers, Nampally,
Hyderabad

Copies can be had from-
SANSKRIT ACADEMY
(Adarsha Shodha samstha)
Osmania University, Hyderabad-07
Phone&Fax 040-27070281
Website – www.Osmania.ac.in/sanskritacademy

In Public domain. Digitization Muthulakshmi Research Academy

पुरोवाक्

रामप्प नामकस्य शिल्पिनः काकतीयसाम्राज्याधिनेत्र्याः रुद्राम्बायाश्च प्रणयगाथा अस्य काव्यस्य इतिवृत्तम्। ओरुगल्लुनगरसमीपे स्थितस्य प्रसिद्धशैवालयस्य निर्माता, समकालीनेषु शिल्पिषु प्रथितयशः रामप्पा अस्य काव्यस्य नायकः। त्रयोदशशताब्दीयस्य, काकतीयसाम्राज्याधिनेतुः गणपतिदेवस्य पुत्री रुद्रमाम्बा चास्य काव्यस्य नायिका। नायिकानायकावुभावपि आन्ध्रदेशस्येतिहासदृशा महद्यशस्विनावितिकारणात् तयोः प्रणयकथेतिवृत्तमिदं काव्यमत्यन्तं प्राधान्यं महत्त्वञ्च वहति। इतः पूर्वमिदं काव्यं सौपर्णग्रन्थमाला इत्याख्यया संस्थया नूजिवीडुपत्तने 1967तमे वर्षे तेलुगुलिप्यां प्रकाशितम् आसीत्। किन्तु ग्रन्थप्रतयश्च अद्यत्वे संस्कृतजगति नोपलभ्यन्ते। तन्मनसि निधाय संस्कृतप्रेमिणां सौकर्याय काव्यमिदं नागरलिप्यां संस्कृतपरिषद् प्रकाशयति।

संस्कृतान्ध्रोभयभाषानिपुणः, उभयभाषाकाव्यनिर्माणकुशलः, हयग्रीवशतकम्, गान्धेयचरितमिति संस्कतकाव्यद्वयकर्ता, विद्वत्कविप्रशंसितः श्रीवेङ्कटरामाचार्यः अस्य कविः।

श्रृङ्गार-शान्त-रौद्र-बीभत्सादिरसरञ्जितं,बहुभिरलङ्कारैश्चालङ्कृतमिदं काव्यं संस्कृतपरिषद् पक्षतः प्रकाश्यत इति महदानन्दं जनयति। इदं काव्यं संस्कृतप्रणयिनां, कवीनां, विदुषां, विद्यार्थिनाञ्च प्रशंसाभाजनं मनोहरं च भवतीति आशासे।

आचार्य टि.केशवनारायणो वेदालङ्कारः

निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

'शिल्पश्रीः' इति काव्यस्य प्रणेता श्रीदुरिशेटि वेङ्कटरामाचार्यः। मङ्गाम्बा-कनकाचार्ययोर्जज्ञे-

श्रीमत्परमशिवप्रसादाऽसादितहृद्यसाहित्यविद्याविश्वसृड्वंश्यसुपर्णसगोत्रमङ्गाम्बा-कनकाचार्यपुत्ररसमयोभयकवित्वधुर्यवेङ्कट-रामाचार्यप्रणीते, शिल्पश्रीनाम्नि काव्ये पञ्चमसर्गः।(पृ.सं.76)

असौ सौपर्णः। कविपुङ्गवोऽयं, संस्कृतान्ध्रोभयभाषाकाव्य-निर्माणकुशलः उभयकविमित्रं च अभवत् । असौ आन्ध्रभाषायाम् अनार्कलि, अथर्वणाचार्युडु नामके काव्ये विरच्य, सर्वान्ध्रसहृदय-हृदयाह्लादम् अजनयत्। अपि च अयं कालिदास रघुवंशकाव्यस्य आन्ध्रानुवादं चक्रे।

साहित्यविद्याप्रवीणपट्टभद्रोऽयं कविः, संस्कृतभाषायां शिल्पश्रीः, हयग्रीवशतकम्, गाधेयचरितमिति कृतीः निर्माय, विद्वत्कविताभिरामो, महोदारमनीषया, उभयभाषाप्रौढिमत्काव्यशिल्पपारगश्चाभवत्। तेषु शिल्पश्रीः नामकं काव्यं सुसम्पन्नं, चारित्रिकशिल्पप्रधानेन वस्तुना। द्वादश-त्रयोदशशताब्द्योः क्रैस्तव्योरान्ध्रप्रदेशे काकतीय इति प्रसिद्धा राजानो बभूवुः। तेषु प्रथितो गणपितदेवस्तस्य सुता च रुद्रमा।

सर्वे च ते काकतीयाः वीरशैवाः। तेषामेव काले विशेषेण शैवं शिल्पं प्रथां भेजे। मार्कोपोलो नाम इटलीदेशीयो यात्रां कुर्वन्नत्रागत्य काकतीयराज्यं रुद्रमां शिल्पं च बहुधा प्रशशंस। सः काकतीयो राजा गणपतिदेवो रामोजुना रामप्पेन वा केनाऽपि शिल्पिना कश्चिच्छिवालयं, निर्मापयामास।

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनशिल्पाचार्येषु अनेकेषु आनन्दस्थपतिः रामप्प शिल्पाचार्यो अन्यतमो, रामप्पदेवालयनिर्माता, काकतीयगणपतिदेवसम्मानितः। तमेनं महापुरुषं नायकीकृत्य विरचितं शिल्पश्रीनामकं काव्यमिदं न कस्य प्रमोदाय भवति। तथा चेदं काव्यं पञ्चसर्गात्मकं शिल्पप्रधानम्। इतिवृत्तम्– काकतीयरुद्राम्बाराज्यारम्भकालस्य रामप्पगुडि इति प्रसिद्ध–माहेश्वरालयनिर्माणस्य च सम्बन्धीदमितिवृत्तम्। तदानीन्तनः तरुणशिल्पी रामोजुरात्मटङ्कविनिस्सृतां राशीभूतां शिल्पविभूतिं द्रष्टुम् आगतां रुद्रमां वीक्ष्य तत्सौन्दर्यसमाकृष्टस्तदानन्दमयेन भावेन आलयकुड्येषु परम्परया निर्मितासु स्त्रीमूर्तिषु तस्या रूपरेखा एव प्रतिभाम्।

युवराज्ञी रुद्राम्बाऽपि, न खलु स्त्रीप्रकृतेरतीता। तथा च तस्य शिल्पिनो रामप्पस्य बहिरन्तस्सौन्दर्यरेखाभ्याम् अत्यन्तं समाकृष्टा बभूव। राज्ञी वासनियमस्तु प्रणयं रुरोध दूरीचकार च । तथापि सा तत्प्रभावेन सर्वसमग्रशिल्पिनो वशवर्तिन्यभूत्।

किन्तु को वा जानातु कुसुमकोमलं तस्या मन आन्तर्यं च। को वा न खलु करोतु तस्याज्वरनिदानम्। तापो दुस्सहो बभूव। परिणनाम च चिकित्सातीता व्याधिः। कथञ्चित्सचिवानुमता सपरिवारम् आलयप्राङ्गणेषु निर्जगाम। हन्त भोः! तथाविधमात्मानं समाकर्षन्ती सा महाराज्ञी किल! न खलु समीचीनः असमानयोर्मध्यो सङ्गमः। असमान्योऽयं शिल्पी रामोजुः। शरवेगं निर्माणाय आलयम् एकाग्रतया बभूव कृती सुकृती च। शशासात्मानं सत्वरमिन्द्रियविकारात्। ददर्श रामोजुरात्मोल्लिखितं माहेश्वरमालयं तदेकध्यानम्।

In Public domain. Digitization Muthulakshmi Research Academy

वियतिधगद्धगायमानं, विराजमानमालयशिखरं च असौ अभूत्परवशः। लब्धाऽऽनन्दवल्ली। वृष्टा चामृतवृष्टिः।

अत्रान्तरे आगतैव महाराज्ञी रुद्राम्बा। आलयस्य पुरतो लिङ्गरूपिणः परमशिवस्य समक्षं शिल्पिनो देहः पिण्डीभूय स्थितः। विवृतश्च ब्रह्मरन्ध्रद्वारबन्धः। महाराज्ञी रुद्राम्बा प्रतिमेव स्तब्धा। किञ्चिदाश्वास्य तत्समीपे दुःखेनोपविश्य उन्नमय्य, सप्रणयमस्य शिरोऽङ्कमारोप्य तरुणपल्लवकोमलरागरञ्जितेन करेणास्य कोमलं देहं स्पृशन्ती अनिमिषलोचनाभ्यां मुखं तस्य अद्राक्षीत्।

अत्रान्तरे निद्रालुपुण्डरीकाभ्याम् आविर्बभूव, शिल्पिनो नेत्राभ्याम् उन्मीलनरेखा। उभयोर्लोचने सञ्जग्मतुः परस्परम्। पुनः शिल्पाचार्यस्य, निमीलतुर्लोचने साकं राज्ञीनेत्राभ्याम्। न पुनरुन्मीलतुः रामोजुनेत्रे, राज्ञीनेत्रे तु कथञ्चिदुन्मीलतुः कदाचिदियं चारित्रिकगाथा श्रीपन्दिरि मल्लिकार्जुनरायसम्पादितायां किन्नेरपत्रिकायां मुद्रिता। अस्याः कथायाश्चारित्रिकशिलालेखनादिप्रमाणानि नोपलभ्यन्ते। तथापि जनतापारम्पर्याऽधिगतं रामोजुचारित्रकवस्तु सरससाहित्यमार्गे पुटपाकसमुन्नीतं सत् रूपान्तरं काव्येन व्रजति। लौकिकमालिन्यात् क्षालितं भवति। रसमयकविहृदयभावितं सत् समावतरत्सुन्दरमुज्ज्वलं च काव्यं शिल्पश्रीरिति नाम्ना।

काव्येऽत्र तु कविर्दुरिशेटि वेङ्कटरामाचार्याः शिल्पाचार्यपात्रं विशिष्टमार्गेण अपोषयत्। चारित्रकेतिवृत्ते स्वयं विगतजीवो रामोजुरत्र काव्ये कुत्रापि जगामेति प्रस्तुतः।

अभिवीक्षुतुकामया, तया सगतोऽश्रावि, कुतोऽपि, कुत्रचित्।
चपला समशीलसंसृतिं प्रतिनिर्वेदवता हि चेतसा। (5-69)

In Public domain. Digitization Muthulakshmi Research Academy

सन्निवेशोऽयं, परम्परागतशिल्पाचार्याणां जीवननैर्मल्याय प्रणिधानप्रधाननैतिकमहत्त्वाय च दृष्टान्तः।

एवं काकतिराज्यरक्षायै, दीक्षितो महास्थपतिरुत्तममानुषधर्मानुष्ठाय जगदादर्शभूतः चिरञ्जीवी च चकासे। तन्निर्मितो रामप्पदेवालयोऽद्यापि कलाभिज्ञानं भगवद्भक्तानां च आराधनीयो जागर्ति। रामप्पकृतेन शाम्भवेन स्थापत्येन काकतीयवंशस्सर्वोऽपि माहेश्वर इति ज्ञायते। जगच्छिल्पिनि परमात्मनि विहितचेतसां मानवानां लोकहितदीक्षैव स्वीकार्येति कर्तव्यतामुपदिशति काव्यमिदं कान्तासम्मिततयोपदेशयुजे इत्याचार्यमम्मटभट्टवचनस्य प्रबलमुदाहरणं च भवति।

कृतिभर्ता–कवेरेतस्य काव्यस्य भर्ता सद्गुणसम्पन्नो शिष्यः सम्प्राप्तः। श्रीशोभनाचलाभिधानो असौ न केवलं शिष्यभूतः किन्तु कव्युक्तदिशा शिष्यः, (मित्रं) मातृवत् कष्टसमये रक्षतीति ज्ञायते।

श्रीरस्त्वभ्युदयोऽस्तु सुधीरस्तु जयोऽस्तु शुभ्रदीधितिकीर्ति।
श्रीरस्तु, शोभनाचलधीराय, कुटुम्बिने, सते ते महते।।

(काव्योपहारः1श्लो)

शिष्योऽसि मित्रमसि मातृवदात्तरागा–
दत्यन्तकष्टसमयेषु च रक्षिताऽसि।
दाताऽसि मे, समुचितानि धनानि दत्वा
तत्ते, ददामि मृदुकाव्यमिदं रसार्द्रम्।। (तत्रैव 13 श्लो)

वर्णनानैपुण्यम्–

पूतगौतमीप्रशंसया समारब्धे पञ्चसर्गात्मिके अस्मिन्काव्ये महाकाव्यलक्षणान्तर्गतपुरवर्णनं कविना अनेन कृतम्।

In Public domain. Digitization Muthulakshmi Research Academy

तद्गौतमीशिशिरपावनशीकराणां-
वोढा तटस्थतरुकोमलपुष्पगन्धी।
वायुर्विनोदयति, यत्र महान्ध्रदेश-
पुत्रान् पुरा जनिशतैः कृतपुण्यभाजः।। (शि.श्री.1-5)
तद्देशनायकमणीव विचिन्त्यमाना-
प्राकारसप्तकविभूषणभूष्यमाणा।
हर्म्याग्रमारुतचलद्ध्वजमध्यवर्ति-
वाराहचिह्नपरितर्जितशत्रुसैन्या।। (शि.श्री.1-6)
काकतीयनरपालपालिता लालितेव नवकोमला प्रिया।
सा व्यराजदमरावती यथा वज्रपाणिपृथुबाहुरक्षिता।। (1-7)
एकशिला, हृद्या नगरीषु प्राकटरूपा रूपवतीषु।
यत्कलकण्ठीर्वीक्ष्य वदेयुर्दैवतयोषाः प्राकृतभामाः।। (1-8)

नदीवर्णनम् (गोदानदीवर्णनम्)-

अस्ति प्रशस्तसलिलैरनिशं वहन्ती-
गोदावरी, पटुनटद्रसतुङ्गभङ्गा।
सूत्रैर्जगन्निगमसारपरैः पवित्रं
यस्याः पितुर्भगवतः खलु गौतमस्य।। (शि.श्री. 1-4)

वसन्तवर्णनम्-

मल्लीलताः कोमलपुष्पिताग्रा जनाय भक्त्या वनमागताय।
वसन्तलक्ष्म्या, मृदुलस्मितस्य शुभ्रप्रभा रेजुरिवातिथेय्याः।।

अत्र कोमलपुष्पिताग्रा मल्लीलता भक्त्या वनमागताय जनाय वसन्तलक्ष्म्या मृदुलस्मितस्य शुभ्रप्रभा आतिथेय्या इव रेजुरिति वर्णितः।

In Public domain. Digitization Muthulakshmi Research Academy

शरच्चन्द्रोदयवर्णनम्–

कुमुदिनीसचिवः खलु चन्द्रमा मधुरतन्मुखकान्तिविनीतिमान्।

नवपटीरपरागविसारिभिः पुलकितं विदधे भुवनं करैः।। (3-24)

अत्र कुमुदिनीसिचवश्चन्द्रमाः मधुरतन्मुखकान्तिविनीतिमान्, नवपटीरपरागविसारिभिः करैः पुलकितं भुवनं विदधे इति शरच्चन्द्रोदयशोभा वर्णिता।

नन्दिवर्णनम्–

श्रृङ्गे मनोज्ञे, नयनेऽपि हृद्ये कर्णौ नितान्तं, कमनीयरूपौ।

सास्ना स्फुरत्किंकिणिदामबद्धा खुराः, खुराः पुच्छमपूर्वमेव।।(2-48)

अत्र देवायतनद्वारदेशस्थितस्य नन्दिनः, श्रृङ्गनयन कर्णसास्नाखुरपुच्छानि रमणीयतया वर्णितानि।

युद्धवर्णनम्–

गदां विचिक्षेप,बलाच्छिताग्रां लक्ष्यीकृतोन्मस्तकमान्ध्रराज्ञीम्।

महायसीं तां शकलीचकार मृत्पिण्डतुल्यं, गदयैव राज्ञी।।(4-31)

अत्र महादेवरुद्रमयोर्युद्धे सरोषं महादेवनृपो बलाल्लक्ष्यी-कृतोन्मस्तकमान्ध्रराज्ञीं शिताग्रां गदां विचिक्षेप। राज्ञी रुद्रमाम्बा महायसीं तां गदां गदयैव मृत्पिण्डतुल्यं शकलीचकारेति गदायुद्धं वर्णितम्।

देवायतनवर्णनम् –

अग्रे प्रतिद्वारमपूर्वनाट्यकलाकलापेन महोज्वलाभिः।

स्त्रीभिः कृतस्वागतमप्सरोभिः यथेन्द्रहर्म्ये महिमास्पदाभिः।। (4-60)

In Public domain. Digitization Muthulakshmi Research Academy

देवायतने प्रतिद्वारम् अपूर्वनाट्यकलाकलापेन महोज्वलाभिः स्त्रीभिः इन्द्रहर्म्ये महिमास्पदाभिरप्सरोभिः कृतस्वागतमिव धृतम्। आलयपुरुषवर्णनम्–

इदमीदृशनश्वरं जगत् बिसपत्रे जलबिन्दुवच्चलम्।
परमात्मनि सम्प्रलीयते क्षणमात्रं किलं तेन भासितम्।।(5-36)

श्लोकेऽस्मिन्निदं नश्वरं जगत् बिसपत्रे जलबिन्दुवच्चलम्। तच्च परमात्मनि सम्प्रलीयते। क्षणमात्रं तत्तेन परमात्मना भासितं किलेति वर्णितम्। अत्र कविरसौ दुरिशेटि वेङ्कटरामाचार्यो अद्वैतवेदान्तदर्शनं निरूपयामास।

शङ्करमते ब्रह्मसत्यं, जगन्मायाकल्पितमत एव, चानिर्वचनीयम्। सत्ता त्रिविधा पारमार्थिकी व्यावहारिकी प्रातिभासिकी च। परमार्थसत्त्वं ब्रह्मण एव, जगतः सत्यं व्यावहारिकम्। शुक्तिरजतादेश्च सत्त्वं प्रातिभासिकम्। ब्रह्मणो द्वयी विद्या निर्गुणं सगुणञ्च। तत् मायाशबलं ब्रह्म सगुणं तदेव ईश्वरः। निर्गुणं ब्रह्म तु मायया अदृष्टपूर्वम्। शङ्करमते ज्ञानादेव मुक्तिः कर्माणि चित्तशुद्धावुपयोगानि।

श्लोकेऽस्मिन् आत्मब्रह्मणोरैक्यं प्रतिपादितम्। तत्त्वमसि (छा.उ.6-8-7) इत्येतन्महावाक्यम्, आत्मब्रह्मणोरैक्यं प्रतिपादयद् अवलोक्यते। वेदान्तो हि मानवीयमेधाकृतचिन्तनस्य पराकाष्टा। तदीयैकत्ववादो वस्तुतः सर्वानपि वादान् अध्यात्मविषयकान् जयति।

एवं श्लेकेनानेन अद्वैतवादिनो मधुरामाकूतिं श्रोतुं शक्नुमः। कविरयम् अद्वैतसिद्धान्तमनुयायीति वक्तुं शक्यते।

ब्रह्मणो लक्षणमप्यसौ कविः प्राह–

तत एव शिवं च सुन्दरं न हि सत्यं परमात्मनः परम्।

In Public domain. Digitization-Muthulakshmi Research Academy
सकल विकल हि जायते परमे शिल्पानि तु प्रलीयते।।(5-37)

श्लोकेऽस्मिन् ब्रह्मविदामाप्नोति परम्। तदेषा अभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्मा। यो वेद निहितं गुहायां परमे व्योमन्। सो अश्नुते सर्वान् कामान्स्थह। ब्रह्मणा विपश्चितेति(तैत्तिरीयोपनिषद्–आनन्दवल्ली1-1)

इत्यादीनां तैत्तरीयोपनिषद्वाक्यानां समग्रस्वरूपं दृष्टिगोचरं भवति। एषु वाक्येषु ब्रह्मविदाप्नोति परम् इति वाक्यस्य व्याख्यानं तु–

१. ब्रह्म – सत्यं ज्ञानमनन्तं ब्रह्म।

२. वित् – यो वेद निहितं गुहायां परमे व्योमन्।

३. आप्नोति – सोऽश्नुते सर्वान् कामान् सह।

४. परम् – ब्रह्मणा विपश्चितेति।

इति प्रपञ्चितं तैत्तरीयोपनिषद्यानन्दवल्यां प्रथमानुवाके। षल्लिङ्गसूचक ब्रह्मवल्लीवाक्यानि यथा–

१. क) उपक्रमः – ब्रह्मविदाप्नोति परम्। (1-1)

ख)उपसंहारः – आनन्दो ब्रह्मेति व्यजानात्। (3-6)

२. अभ्यासः – स यश्चायं पुरुषे (2-8)

३. अपूर्वतः – यो वेद निहितं गुहायाम्। (2-1)

४. फलम् – अभयं प्रतिष्ठां विन्दते,अथसोऽभयङ्गतो भवति(2-7)

५. अर्थवादः – सोऽकामयत।

६. उपपत्तिः – असन्नेव भवति, असद् ब्रह्मेति वेद चेत् (2-6)

को ह्येवान्यात्कः पाण्यात् (2-5)

इत्यवगन्तुं शक्यते। तैत्तरीयोपनिषद् द्वितीयतृतीययोः प्रपाठकयोः, या ब्रह्मविद्या अभिहिता तस्याः सम्प्रदायप्रवर्तको वरुणः, तस्मात्तद् उभयरूपोपनिषद् वारुणी। तस्यां परमपुरुषार्थस्य ब्रह्मप्राप्तिलक्षणस्य

In Public domain. Digitization Muthulakshmi Research Academy
साक्षादेव साधनभूतायाः ब्रह्मविद्यायाः प्रतिपादितत्वादिय वारुणी मुख्या। इयमेव तत एव शिवं च सुन्दरम् इत्यादिश्लोके कथितेति कथने न किमपि साहसम्।

एतद्भावस्य भारतीत्वम् –रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति (तै.उ.2–7) इति तैत्तरीयोपनिषदि प्रोच्यते। यत्र यत्र रसत्वं तत्र तत्र माधुर्यं सौन्दर्यं चाभीष्यते। मम्मटेन काव्यप्रकाशे काव्यप्रयोजनत्वेन अभिधीयते –

काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।(का.प्र. 1–2)

इत्यत्र शिवेतरक्षतये इत्यनेन शिवस्य सद्यः परनिर्वृतये, कान्तासम्मिततयोपदेशयुजे इति पदद्वयेन माधुर्यस्य सौन्दर्यस्य च समन्वयो लक्ष्यते। हितं मनोहारि च दुर्लभं वचः। (किरात.1–4)इत्यत्र भारविकविना शिवस्य सुन्दरस्य च सामञ्जस्यं समर्थ्यते।

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः इत्यत्रापि साहित्येन सत्यस्य सङ्गीतेन माधुर्यस्य शिवस्य च, कलाशब्देन सौन्दर्यस्य च समन्वयोऽभीष्यते।

साहित्यशब्दव्युत्पत्तौ हितेन सहितं सहितम्, सहितस्य भावः साहित्यम्,हितशब्देन शिवस्यापि सङ्कलनं साहित्येऽभिधीयते। काव्यस्य रसानुभूतेर्ब्रह्मानन्दसहोदरत्वेन माधुर्यसमन्वितत्वम्, आनन्दात्मकत्वञ्च स्वीक्रियते। सत्यं ब्रूयात्, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम् इत्यत्र सत्यस्य शिवस्य च समाहारोऽपेक्ष्यते। उत्तररामचरिते भवभूतिः सूनृतां वाचमित्थं स्तौति –

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तिं सूते दुर्हृदो निष्प्रलाति।

In Public domain. Digitization: Muthulakshmi Research Academy
शुद्धां शान्तां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः।। (4-30)

प्रियं च सत्यं च वचो हि सूनृतम् इति सूनृतशब्दे सत्यस्य सुन्दरस्य च ग्रहणम्। मातरं मङ्गलानाम् इत्यनेन शिवस्य च ग्रहणम्। एवं सूनृतशब्दे सत्यं शिवं सुन्दरम् इत्यस्य मूलं प्राप्यते। बृहदारण्यकोपनिषदि सैषा वाग् ब्रह्मरूपेण स्तूयते –

वाग्वै सम्राट् परमं ब्रह्म। (बृह.आ. 4-1-2),

सत्यं ब्रह्मेति, सत्यं ह्येव ब्रह्म। (बृह.आ. 5-4-1)

माण्डूक्योपनिषदि ब्रह्म शान्तं शिवम् अद्वैतम् (मा.7) इत्येवं रूपेण प्रतिपाद्यते।

ब्रह्म शिवं गृह्यते। काव्यं च ब्रह्मप्राप्तिसाधनत्वात् ब्रह्मगतगुणानां ग्राहकं स्यात्। अतः काव्ये शिवतत्त्वस्य सङ्कलनम् अनिवार्यम्। ब्रह्मणः सच्चिदानन्दनामान्यपि सत्यस्य शिवत्वरूपज्ञानस्य आनन्दस्य च ग्रहणं क्रियते।

केचन सरस्वत्याः स्वरूपे ज्ञानप्रतीकेन पुस्तकेन सत्यस्य हंसेन नीरक्षीरविवेकरूपशिवत्वस्य वीणया कमलेन च सौन्दर्यस्योपादानं मन्वते। केचनाचार्याः सत्ये शिवस्य, शिवे सौन्दर्यस्य च दर्शनं विदधाति। साहित्ये सत्यं शिवं सुन्दरम् त्रयमेतत्, समन्वितम् अवेक्ष्यते।

एतेषाम् एकतमस्याप्यभावे काव्यत्वहानिः। सत्यं शिवं सुन्दरम् इत्यत्र उत्तरोत्तरम् उत्कर्षोऽङ्गीक्रियते। काव्ये सत्यात् शिवस्य शिवाच्च सौन्दर्यस्य महत्वम् अभीष्टम्।

एवं तत्त्वत्रयस्यैतस्य समवायेन काव्यत्वं सम्पाद्यते। गुणत्रयसमन्वितश्च काव्यं निर्दुष्टं सत् लोकाराधनक्षमम्। गुणत्रयसम्पुष्टश्च कविः रससिद्धोऽजरोऽमरश्च सञ्जायते।

In Public domain. Digitization Muthulakshmi Research Academy
काव्यस्यास्य प्रधानभूतरुद्राम्बिकारामोजुपात्रोन्मीलने हृदयावस्थानप्रदर्शने चोदात्तनायकचित्रणोचितशक्तिशाली कविरयं कृतकृत्य एव। रामप्पशिल्पाचार्यस्यात्मनिग्रहशक्तिः सनातनशिल्पसंयमिनां मार्गानुसरणप्रकारः लोकोत्तरशिल्पनिर्माणनैपुण्यं त्रिलिङ्गदेशाराधनदीक्षा च सर्वमस्मिन् काव्ये निरवद्यम् अतिहृद्यमभिवर्णितम्।

किं बहुना काव्येऽस्मिन्निदं मनोहरं नेदमिति वक्तुमशक्यम्। सर्वाङ्गसुन्दरमिदं कवयितुर्महाकविपदगौरवमावहतीत्यत्र न कश्चित् सन्देहः।

शिल्पश्रीकाव्ये रसः(रसपुष्टिः)- काव्येऽस्मिन् श्रृङ्गाराभासात् प्रादुर्भूतस्य शान्तरसस्य व्यञ्जकत्वे रसोचितकथायाः स्थापनं तत्राप्यनुपयोग्यांशस्य परित्यागः उपयोग्यंशस्य कल्पनञ्च कविरयं जग्राह।

अन्ये च वीरबीभत्सादिरसा देवगिरिराजदण्डयात्रावर्णने (शि.श्री.3स) रुद्राम्बामहादेवयोर्युद्धवर्णने(शि.श्री.4स) सम्यक् परिपुष्टाः प्रधानरसस्य श्रृङ्गाराभासात् प्रादुर्भूतस्य शान्तरसाङ्गभूता भवन्ति। कविनानेन विषयेऽस्मिन् आनन्दवर्धनाचार्यमतमनुसृत्यैव -

प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने।

एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता।।(ध्व.लो.3-21)

इत्येतच्छलोकं मनसि स्मृत्वा अङ्गित्वेन प्रधानरसः शान्तः परिपुष्टो भवति।

In Public domain. Digitization Muthulakshmi Research Academy

काव्यालङ्कृतयः–

काव्यमिदं नैकैरलङ्कारैरलङ्कृतो विराजते। तत्र केचनालङ्काराः प्रदर्श्यन्ते। कविरयं भूमिकायां स्वयमेवोपमानालङ्कारप्रयोगनैपुण्यं जगाद–

अपि चात्र सङ्कृतिः – सङ्कर्मस्थपत्याचार्याविश्वकर्मविश्वसृडादीनि छन्दांसि लोके च प्रसिद्धानि, शिल्पार्थवाचकानि पदानि प्रयुक्तानि। यजुर्वेदे इष्टकोपधाने प्राचीदिशामादीनि पञ्चयजूंषि सन्ति। तेषु सानगसनातनाहभूनपत्नसुपर्णा इति पञ्च ऋषयो दृश्यन्ते। त एव स्कन्दादिपुराणेषु मनुमयत्वष्टुशिल्पिविश्वज्ञरूपतया कथिताः।एते शिल्प सम्प्रदायस्यादिमा ऋषयः। तथैव तत्सम्प्रदाये ऋभ्वङ्गिरः प्रभृतयोऽनेके ऋषयश्छन्दसि प्रसिद्धाः सन्ति। त एतेऽत्र काव्ये यथावसरम् उपमानोपमेयद्रव्यतया स्वीकृताः। (भूमिका पृ.14–15,शि.श्री.)

उपमालाङ्कारः–

पादाभिघातात्कुपितः फणीव श्वसन् महादेवनृपः सवेगम्।

आरुह्य कस्यापि रथं सचापो वृषेव वर्षं व्यसृजच्छरौघम्।।(4–34)

अत्र रूद्राम्बिकामहादेवयोर्युद्धे महादेवनृपः सचापः सवेगं रथमारुह्य पादाभिघातात्कुपितः फणीव वृषेव शरौघं वर्षं व्यसृजदित्युपमालङ्कारः।

अत्र फणीवेति वृषेवेति च इवेन सह नित्यसमासः। अत एवात्र समासपूर्णा श्रौती।

अर्थान्तरान्यासालाङ्कारः–

१. देवादृते पौरुषमात्मशक्त्या न हि प्रतिष्ठेत फलं लभेत।। (2–20)

In Public domain. Digitization Muthulakshmi Research Academy

२. दैवादृते पौरुषमात्मशक्त्या कथं प्रतिष्ठेत फलं लभेत।। (4-10)

३. स्त्रीदृष्टपूर्वाऽप्यपरेव भाति प्रत्यग्रभूषाम्बरधारणेन।। (2-38)

४. कृतान्तपाशोपहतात्मबुद्धेराशीविषेरज्जुरिति भ्रमो हि।। (4-8)

५. मैत्रीविरोधौ महितौ भवेताम् समानशीलव्यसनायुधानाम्।। (4-18)

६. निचिक्षिपेऽनुग्रहमात्मवत्ता महात्मनां सन्निहिता सदैव।। (4-38)

७. न तु जातु सुखं स पद्यते सिकता तैलवती कथं नु किम्।। (5-24)

८. निरचेष्ट मतिं तपस्वतीं न हि धीराः प्रचलन्ति संस्कृतौ।। (5-55)

इत्यादयोऽर्थान्तरन्यासाः, नित्यव्यवहारोपयोग्याः काव्यस्य महिमानं बहुधा व्यञ्जयन्ति।

रूपकालङ्कारः-

रूद्राम्बिकेन्दीवरलोचनानां दिने दिने कृत्यवतां जनानाम्।

मुखेन्दुनिष्यन्दिसुधास्मितेन शुभेन शुभ्रेण मुदं विधात्री।।(4-46)

अत्र महादेवनृपस्य राज्यप्राप्तायाः प्रतापभूपालकिरीटरत्नप्रभावली-रञ्जितपादपीठाया जयोच्चलत्केतनमध्यवर्ति वाराहमुद्राकुलितारिपीठा-याः, रुद्राम्बिकायाः प्रहर्षो वर्णितः।

अत्र रुद्राम्बिकाया लोचनानामिन्दीवरत्वरूपणेन मुखस्येन्दुत्वरूपणेन स्मितस्य सुधात्वरूपणेन चेत्यकेदेशविवर्तिरूपकम्।

उत्प्रेक्षालङ्कारः-

विविधसैन्यसमुत्थितरेणवो रुरुधिरे परितो नभस्तलम्।

पृथुसमुत्कटदन्तिमदाम्बुभिः तलमकारि भुवः किल पङ्किलम्।।(3-35)

देवगिरेः पतिरुन्मदद्विपतुरङ्गमसैनिकगर्वितः पटुकाकतिवाहिनीं शिवबलां रुद्रमाम् अबलामित्यभिययौ। तस्मिन् समये

In Public domain. Digitization Muthulakshmi Research Academy
विविधसैन्यसमुत्थितरेणवो नभस्तलं परितो रुरुधिरे इति, पृथुसमुत्कटदन्तिमदाम्बुभिर्भुवस्तलं पङ्किलमकारि किल, इति च अप्रकृतक्रियासम्बन्धाद् अप्रकृतत्वेन प्रकृतस्य सम्भावनमुत्प्रेक्षा।

उल्लेखालङ्कारः–

क्वचिद्भये क्रूरकृपाणपाणिः क्वचिद्गजे भीषणभल्लहस्ता।

क्वचिद्रथे बाणनिषङ्गचापा सर्वत्र सैकापि बभावनेका।।(4-28)

अत्र महादेवनृपस्य युद्धे रुद्राम्बा हये कृपाणपाणिः गजे भीषण भल्लहस्ता रथे बाणनिषङ्गचापा च भूत्वा सैकापि सर्वत्र अनेका बभाविति वर्णनाद्गृहीतृभेदाभावेऽपि क्रूरकृपाणपाण्यादिविषयभेदादनेक धर्मोल्लेखनादुल्लेखः।

छन्दोवैचित्री –

तत्तत्सर्गेषूपयुक्तानि, वृत्तान्यपि कथाविषयानुरूपाणि, सहृदयसम्मतान्येव। महाकविकालिदासेनेव(कु.स.4,1-44) अनेनापि कविना पञ्चमसर्गे प्रयुक्तं वियोगिनीवृत्तं रुद्राम्बिकानुरागस्य निष्फलतां शिल्पिनो विषयवितृष्णतां शान्तिपरतां च व्यनक्ति –

अथ तामभिवीक्ष्य सङ्कृतिः

न हि तत्र तवास्ति योग्यता। (शि. श्री.5,1)

वसते स्तन्मम बाधते मनः।।(शि. श्री.5-76)

(विषमे स स जा समे गुरुः,स भ रालोऽथ गुरुर्वियोगिनी।)

शिल्पश्रीकाव्यप्रयोजनम्–

भारते तिस्रः, ऐतिहासिकधारास्सन्ति। ते च–

1.शासनानि (शिला–ताम्रफलकलेखनानि) 2.वाङ्मयम् (काव्यानि)

3. पुरातनस्थानखननपरिशोधनानि

In Public domain. Digitization Muthulakshmi Research Academy

एषु शिल्पश्रीः इति काव्यं संस्कृतवाङ्मये ऐतिहासिककाव्यम्। इतिहासस्य लक्षणं यथा–

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते।।

(वाचस्पत्यम्.दि.भा.पृ.924–श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यः)

परक्रियापुराकल्प इतिहासगतिर्द्विधा।
स्यादेकनायका पूर्वा द्वितीया बहुनायका।। (काव्यमीमांसा)

1. परक्रिया– रामायणम्। 2.पुराकल्पः – भारतम्।

दुर्गादासमते इतिहासलक्षणम् –

यः कश्चिदाध्यात्मिकाधिदैविकाधिभौतिको वा अर्थ आख्यायते, दिष्ट्युदितार्थावभासनार्थं स इतिहास इत्युच्यते।(नि.10–26)

ऐतिहासिककाव्यस्य द्वे प्रमुखे लक्ष्ये भवतः –

1.महापुरुषाणां परिचयः 2.भूगोलस्य वास्तविकं ज्ञानम्

अनया दृष्ट्या इतिहासप्रधानानि काव्यानि लिख्यन्ते। भारतीयसमाजे इतिहासः प्रियतरेषु रुचिकरेषु विषयेषु मतो बभूव। जना इहत्याः उत्सुकतापूर्वकं तत्र स्वकीयां प्रगाढमभिरुचिं निदधुः।

अत्र एव तु कालिदासबाणादिकास्तं सादरं स्मरन्तोऽवाप्यन्ते। ऐतिहासिककाव्यरङ्गे शिल्पश्रीरिति काव्यमिदं रुद्रमारामप्पयोः ऐतिहासिककथां वर्णयति।

महाकविकालिदासः अभिज्ञानशाकुन्तले लिखति किन्तु यादृशीतिहासनिबन्धेषु कामयमानानामवस्था श्रयते तादृशीं तव पश्यामि। (अ.शा. 3अङ्कम्)

In Public domain. Digitization Muthulakshmi Research Academy
महाकविर्बाणो लिखति यत् – चन्द्रापीड.....कथासु नाटकेषु आख्यायिकासु काव्येषु महाभारतपुराणेतिहासरामायणेषु..... कौशलमवाप। (कादम्बरी चन्द्रापीडस्य यौवनारम्भवर्णना)

या जातिः स्वकीयेन प्राचीनेन गौरवेणेतिहासेन साहित्येन च नात्मानं गौरवान्वितं मनुते, सा स्वजातीयजीवनस्य प्रधानमाश्रयं समुन्मूलयति। शिलाताम्रफलकादिभ्यः ज्ञाता अप्यैतिहासिकविषयाः काव्यरूपेण यदि निबद्धा भवेयुस्तर्हि विषयास्ते मधुमासद्रुमा इव नवा आभान्ति। अत एव रसभावाद्याश्चर्येण काव्यार्थानामानन्त्यम् आनन्दवर्धनाचार्येण सुप्रतिपादितम्।

दृष्टपूर्वा अपि ह्यर्थाः, काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मुधमास इव द्रुमाः।।(ध्व.लो.4–4)

इति शम्।

डा.वी.श्रीनिवासशर्मा

सम्पादकः

In Public domain. Digitization Muthulakshmi Research Academy

भूमिका

वेङ्कटरामाचार्यः सौपर्णः

भो विद्वच्छेखराः! शिल्पश्रीर्नामेदं काव्यं सुसम्पन्नं केनापि शिल्पप्रधानेन वस्तुना द्वादशत्रयोदशशताब्द्योः क्रैस्तव्योरान्ध्रप्रदेशे काकतीया इति प्रसिद्धा राजानो बभूवुः। तेषु प्रथितो गणपतिदेवस्तस्य सुता च रुद्रमा । सर्वे च ते काकतीया वीरशैवाः तेषामेव काले विशेषेण शैवं शिल्पं प्रथां भेजे । मार्कोपोलो नाम इटलीदेशीयो यात्रां कुर्वन्नत्रागत्य काकतीयराज्यं रुद्रमां शिल्पं च बहुधा प्रशशंस। सोऽयं गणपतिदेवः काकतीयो राजा नाम्ना रामोजुना रामप्पेन वा केनापि शिल्पिना कश्चिच्छिवालयं निर्मापयामास। तस्मिन् समये रुद्राम्बा युवराज्ञी। सा तु यूनि शिल्पिनि बद्धभावेति श्रूयते सोऽपि तामधिगतचित्तश्च। किन्तु तयोर्मध्ये संरूढः प्रेमभावो विफलः सञ्जातः। तेन संकृतिना (शिल्पिना) निर्मितं शिवमन्दिरमपूर्वनिर्माण-कौशलमधुनापि प्रदर्शयति। स्वीकृतमेतदितिवृत्तं मया चारित्रिकमिदमौचित्यपरिपुष्टये किञ्चित् परिवर्तितं विप्रलम्बश्च भक्तिवात्सल्यरूपतया तथाचेदं काव्यं पञ्चसर्गात्मकं शिल्पप्रधानं वैदिकमार्गानुयायिना मया तत्र तत्र प्राचीने लोकिके वैदिके च वाङ्मये दृष्टा यादृशी शिल्पस्य प्रशस्तिः साऽत्र सर्वात्मना निक्षिप्ता। अपि चात्र संकृतिसंकर्मस्थपत्याचार्यविश्वकर्मविश्वसृडादीनि छंदसि लोके च प्रसिध्दानि शिल्पर्थ्यवाचकानि पदानि प्रयुक्तानि यजुर्वेदे इष्टिकोपधाने प्राचीदिशामादीनि पञ्चयजूंषि सन्ति। तेषु सानग सनात नाहभून प्रत्न सुपर्णा इति पञ्च ऋषयो दृश्यन्ते। त एव स्कान्दादिषु पुराणेषु मनु मय

In Public domain. Digitization Muthulakshmi Research Academy

त्वष्टृ शिल्पि विश्वज्ञ रूपतया कथिताः। एते शिल्पसम्प्रदायस्यादिमा ऋषयः। तथैव तत्सम्प्रदाये ऋभ्वङ्गिरः प्रभृतयोऽनेके ऋषयः श्छन्दसि प्रसिध्दाः सन्ति। त एतेऽत्र काव्ये यथावसरं उपमानोपमेयद्रव्यतया स्वीकृताः। इतः पूर्वमेव प्रान्तीयायामान्ध्रभाषायां द्वित्राणि काव्यानि विरच्य प्रचलितानि सहृदयाः हृदयरञ्जकमकुर्वन्। तथैव प्रथममपीदं संस्कृतकाव्यं रसमार्गजुषां विदुषां मनांसि प्रह्लादयत्विति भगवदनुग्रहस्य सहृदयाशिषां च बलेन प्रकटीक्रियतेऽधुना।

अयि सोदरसहृदयाः! असारेऽस्मिन् देशे परविषयभाषाकलुषिते वराकी गैर्वाणि दिशि दिशि च पश्यत्यतिदयमिति ममाशयः समयेऽस्मिन् तादृशीमां भाषां कश्शृणुयान्नु? कः पश्येन्नु? को वा पठेन्नु? तथापि कालोह्ययं निरवधिर्विपुला च पृथ्वीति महाकविवचसि प्रतीतेन देवीं वाचं प्रति भक्तिभावविलसितेन च चेतसा काव्यमिदं निरमायि रसमार्गानुयायिनां सहृदयानां हस्तेषु प्रादायि । इतः परं विद्वांसः सहृदया भवन्त एव प्रमाणम्।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्री शोभनाचल मित्राय काव्योपहारः

श्रीरस्त्वभ्युदयोऽस्तु सुधीरस्तु जयोऽस्तु शुभ्रदीधिति कीर्ति ।
श्रीरस्तु शोभनाचल धीराय कुटुम्बिने स ते ते महते ।। (1)

इदं पूज्यं काव्यं निरतमपि पूज्येन मनसा ।
भवानास्ते तस्माद्भवति निहितेऽस्मिन् वरमिति ।
अहं निश्चिन्वानस्तदिह करवाणि प्रियसख ।
त्वमेतस्त्वीकृत्य प्रभव चिरमायुस्सुकृतवान् ।। (2)

गुणवत्तरमुत्तरोत्तरं रसवत्काव्यमिदं महोज्ज्वलम् ।
गुणवांश्चभवानतीव मे मतिमाकर्षति तद्दाम्यहम् ।। (3)

काव्यं यशस्करमिति प्रवदन्ति कर्ता
भर्ता च तेन शिवमक्षयमाप्नुवन्तौ।
नीहारहारघनसारपटीरकाश
नीकाश राजितयशो विलसत्प्रभावौ।।(4)

शिल्पात्मकं वरमिदं रसवाहि केचि-
च्छिल्पं प्रशस्य न तु शिल्पिनमाद्रियन्ते ।
सन्तस्तु सत्यपथगामिन एवमादीन्
स्वीकुर्वते न हि पुराणपथाध्वनीनाः।।(5)

शिल्पी पुराणजननान्तर लब्धपुण्य
जातेन संभवति तक्षति दैवमूर्तीः।

In Public domain. Digitization Muthulakshmi Research Academy

तन्मूर्तिदर्शनबलेन विमूढलोको
सम्प्राप्तभक्ति विभवो लसते प्रकामम् ।।(6)

कविर्वदत्यात्मभुवं स्व वाचा तक्ष्णोति टङ्केन तमेव शिल्पी ।
उभौ तमः पूर्णपथाध्वनीन लोकस्य तेजो दिशतः स्वकीयम् ।।(7)

तत्रापि शिल्पी कवितः प्रकृष्टः काव्याच्च शिल्पं बहुलार्थयुक्तम् ।
प्रदर्शितं तच्च समग्रमत्र काव्ये सखे स्वीकुरुते तद्ददामि ।।(8)

त्वयि नेतरि कीर्तिकामने वणिजो भूमिभुजश्च विस्मिताः।
नवशारदनीरदप्रभं धवलं दिव्ययशो विराजितम् ।।(9)

मम जीवनसंशये भवानवहत्काव्यधुरं महाफलम् ।
भगवत्कृपयैव जीवितो भवदीयं भवते ददाम्यहम् ।। (10)

साहित्यपोषणरतो विरलो हि लोके तत्रापि संस्कृतकवित्त्वमहत्त्ववेदी ।
सोऽयं भवानिह पुराणजनुः पवित्र संस्कारपूर्णमनसा लसते विभिन्नः।।(11)

वयः कनीयान् यशसा गरीयानहो भवान् धर्मपथे महीयान् ।
गुणा हि लोके प्रभवन्ति पूज्या वयश्च लिङ्गं च वदन्त्यमुख्यम् ।।(12)

शिष्योऽसि मित्रमसि मातृवदात्तरागादत्यन्तकष्टसमयेषु च रक्षिताऽसि ।
दाताऽसि मे समुचितानि धनानि दत्वा तत्ते ददामि मृदु काव्यमिदं रसार्द्रम्(13)

मयि स्वच्छप्रेम्ना तव हृदयमासीद्विकसितं
यतो वारं वारं कठिनसमयेष्वादृतवतः।

In Public domain. Digitization Muthulakshmi Research Academy

ऋणी ते तेनाहं मधुमधुरकाव्यं रसमयं
ददाम्येतत्तुभ्यं विलसचिरमेतेन लसता ।। (14)

त्यागार्थं संभृतार्था इति खलु कविना गीतमुद्गीथभाजा
दृष्टं तार्कणमद्य प्रविमलमनसा त्वत्कृतेऽस्मिन् महार्घे ।
पायाच्छीतांशुमौलिस्सकलभुवननिर्माणसंत्राण शाली
संकर्मा विश्वकर्मा शिशिरसितदृशा त्वा सदारं सपुत्रम् ।। (15)

भवते ददातु परिपूतकर्मणे सहमित्रबान्धवजनाय धीमते ।
गिरिजार्थभागपरिमुग्धसुन्दरो गिरिराजतुङ्गवृषवाहनश्शिवम् ।। (16)

भवता काव्यमिदं सत्काव्येऽनाहं भवांस्त्विहावाभ्याम् ।
सर्वे वयं च महसा शशिपुष्पाभरणरूपिणोद्दीप्ताः।।(17)

In Public domain. Digitization Muthulakshmi Research Academy

अथ प्रथमः सर्गः

श्रीमद्विश्वात्मकं शिल्पं येन संकृतिना कृतम् ।
तन्महाशिल्पिनं वन्दे विश्वकर्म परात्परम् ।।(1)

यस्यैव निश्वसनमेतदनन्तकोटि विश्वानि शिल्पमहिमापरिपूरितानि ।
नक्षत्रसूर्यशशिभू प्रमुखाश्च यत्र गोला भ्रमंति तमहं कृतधीरुपासे ।। (2)

अक्षं ध्रुवं नभसि मेरुधराग्रभागे ज्योतींषि तान्यगणितानि विधाय चक्रम्।
रात्रिं दिवात्मकभुवे मुहुरेकवारमावत्सरं भ्रमयते महसे नमोऽस्तु ।।(3)

अस्ति प्रशस्त सलिलैरनिशं वहन्ती गोदावरी पटुनटद्रसतुङ्ग भङ्गा ।
सूत्रैर्जगन्निगमसारपरैः पवित्रं यस्याः पितुर्भगवतः खलु गौतमस्य ।।(4)

तद्गौतमीशिशिरपावनशीकराणां वोढा तटस्थतरकोमल पुष्पगन्धी ।
वायुर्विनोदयति यत्र महान्ध्रदेशपुत्रान् पुराजनिशतैः कृतपुण्यभाजः ।।(5)

तदेष नायकमणीव विचिन्त्यमाना प्राकारसप्तकविभूषणभूष्यमाणा ।
हर्म्याग्रमारुतचलद्ध्वजमध्यवर्ति वाराहचिह्नपरितर्जितशत्रुसैन्या ।। (6)

काकतीयनरपालपालिता लालितेव नव कोमला प्रिया ।
सा व्यराजदमरावती यथा वज्रपाणिपृथुबाहुरक्षिता ।।(7)

एकशिला हृद्या नगरीषु प्राकटरूपा रूपवतीषु ।
यत्कलकंठीर्वीक्ष्यवदेयुर्दैवतयोषाः प्राकृतभामाः ।। (8)

In Public domain. Digitization Muthulakshmi Research Academy

ते काकतिक्ष्मापतयोऽपि नित्यं शिरस्सु धृत्वा शिवमाल्यलेशम् ।
माहेश्वरीं शक्तिमवाप्य तेनुरान्ध्रीं नवां चाभिनवां क्रमेण ।।(9)

सर्वाः प्रजास्ताः शिवपादशेखराः सर्वे नृपास्ते शिवभूतिपाण्डुराः ।
सर्वा तदांध्री शिवशक्तिभासुरा सर्वं तदातच्छिवमेव केवलम् ।।(10)

तत्काकतीयनरपालककच्छपाहि कुम्भीन्द्रसार पृथुबाहुतले निषण्णा ।
आन्ध्री तदा चटुलशत्रुभिरप्यगम्या बाह्यान्तराभिरपि विप्लुतिभिर्विमुक्ता(11)

राजा गणपतिर्देवो रराज सुर राजवत् ।
राजराजत्करोत्सृष्टभ्राजमानप्रभा यशाः।। (12)

तत्रत्याः शिल्पिनः श्रेष्ठाः राथकार्यास्तपस्विनः।
ब्रह्मण्यावेदवेदाङ्गशास्त्रविज्ञानशीलिनः।।(13)

टङ्केन संतक्ष्य विशालशैलभागेषु निर्माय दिवानिशं ते ।
शिवस्य लीला चरितान्यकुर्वन् नव्यान्ध्रलक्ष्मीं महनीयरूपाम् । (14)

शिल्पं चाध्ययनं परात्मनिरतास्तेऽधीत्य गार्हस्थ्यत-
स्संपन्ना निजधर्मकर्मपरतामासाद्य शिल्पैस्ततो ।
यज्ञैःपञ्चभिरन्वयोक्तविधिना नित्याश्च नैमित्तिकाः
कुर्वाणा व्यहरन् विनीति निपुणा धर्मेण तच्छिल्पिनः ।। (15)

In Public domain. Digitization Muthulakshmi Research Academy

ते चिक्यिरे धर्मपरा हि वित्तं तेऽभुक्षतार्थं न विंलघ्य कामम् ।
समं विभक्तस्सततं त्रिवर्गो मोक्षाय मार्गं दिशतीव तेषाम् ।।(16)

अन्येऽपि तत्रत्यजना विशुद्धाः स्वधर्मशीलाश्चरितार्थकृत्याः।
शिवे तथा शैव महिम्नि राज्ञि निविष्ट चित्ताश्च मुदाऽऽसते स्म ।।(17)

ये तप्त्वा शरदां सहस्रमृभवस्त्वाष्ट्रास्तथाधर्वणाः
सौपर्णाश्च तथाङ्गिरः प्रभृतयो विश्वानि शिल्पानि ता ।
न्याविष्कृत्य जगन्त्यमूनि जगुपुस्तेषामृषीणां कुले ।
जाता विश्वहितैषिणो विजयिनो धन्या हि ते शिल्पिनः।। (18)

निर्गुणस्य परमात्मन एते मूढजन्तु हितकामनयैव ।
रूपमस्य सगुणं किल कृत्वा धन्यतामतितरां ध्रुवमापुः ।।(19)

दैवानि शिल्पान्यधिगम्य चैते दैवीयशक्त्या दधुरत्र शिल्पम् ।
तद्वैदिकं लौकिकमित्यनन्तं द्विधा स्थितं तद्धि हितं प्रियं च ।। (20)

शिल्पं विना ज्वलति नो मिहिरश्च वह्निः
शिल्पं विना वहति नो सलिलं च वायुः।
शिल्पं विना भवति नो धरणिश्च खं च
शिल्पं न चेद्भवति किं परिवर्तमानम् ।। (21)

विश्वानि कर्माणि विधाय देवो
यो विश्वकर्मा महनीय शक्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

ऋषींश्च तान् सानगमुख्यपुत्रा
नाज्ञप्तवान् शिल्पपरम्परायै ।। (22)

सञ्चालितं तैर्ऋषिपुङ्गवैस्तथा शिल्पं महद्दैवतमानुषं शुभम् ।
तैरात्मवंश्यान्निहितात्मतेजसो ह्यध्यापितं शिल्पमनन्तकामदम् ।। (23)

ब्रह्मण्यो रथकारश्च रामप्प इति विश्रुतः।
तन्महाऋषिवंशेषु जातस्तस्थौ महायशाः ।। (24)

अहो तेजस्सारः स्मितमधुरिमस्यन्दिनि मुखे
विशाले नेत्रे ते समधिगतविज्ञानविषये ।
समा दीर्घा नासा प्रकटयति मेधां सुनिशितां
स्फुरद्वर्चश्शाली भसित धवलः फालफलकः।। (25)

बाहूजानुविलम्बिनौ करतलौ पादौ च पद्मारुणौ
ब्राह्मैस्तैर्वरलक्ष्मभिर्विलसितौ ताम्रोऽधरः कोमलः।
वक्षश्चातिविशालमुन्नतमतिस्फीतो गलो बन्धुरो
दीर्घाह्यङ्गुऽलयस्तनुश्चमसृणस्निग्धासुवर्णोपमा ।। (26)

अन्तेवासि सहस्रसेवितपदः स्वाध्यायशीलः कविः
शिल्पानामधिदेवतेव धरणी भागे चरद्ब्राह्मणम्।

In Public domain. Digitization Muthulakshmi Research Academy

तेजो वा बिसतन्तुनेव धवले नाश्रोणि चालम्बिना
वक्षो भागविभासिना व्यजयत ब्रह्मेण सूत्रेण सः।।(27)

सञ्जीवनौषधमिव प्रकृतेर्जडाया नूत्नामृतौघपरिषेकइवोपलानम्।
रामप्पवीक्षणमतीन्द्रियशक्तिपूर्णं संदृश्यते स्म किमुतत्कथनीयमत्र।। (28)

दम्बोलिसारकठिनोपलशैलसङ्घा रामप्पपावनकरात्तमहामहिम्नः।
टङ्कस्य तस्य पुरतो मृदवो विचित्रं लाक्षेव नव्यनवनीतमिवाद्रवन्त।।(29)

अमृतमिववहन्ती दृष्टिरेषा लसन्ती
कठिनतरशिलाग्रे यत्र तस्थौ चरन्ती।
मधुमयसुभगानामङ्गनापाङ्गकानां
कुवलयदलमाला तोरणश्रीर्हसन्ती।।(30)

यदस्य कृतिनोऽभवत् करगतं महाशैलम
प्यतीन्द्रिय ममानुषं च भवति स्म लोकोत्तरम् ।
लताविटपसंकुलान्यतिविचित्रमानोज्ञका
न्युपान्त सरसीनि तान्युपवनान्यहो रेजिरे ।। (31)

एका शिला गिरिसमो वृषभाधिराज
एकाशिला गिरिजया सहितः कपर्दी ।
एका शिला प्रमथभूतगणाश्चसर्व
एकत्र चास्य सृजनं भवभक्तिपूर्णम्।।(32)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

यदृच्छयातक्षदपूर्वसर्गसम्भावना येव हि सङ्कृतीन्द्रः।
सत्वेकदा वीररसाधिदेवीं शृङ्गारिणीं काञ्चन राजपुत्रीम्।।(33)

शरशरासनपाणिरियं महाकटिनिबद्धकृपाणविभीषणा।
कठिनवर्मसमुन्नतबन्धुरस्फुर दुरः फलका कुटिलालका ।। (34)

विनयलज्जितचारुदृगञ्चला घनबलाश्वखलीनमनोहरा ।
मधुरभीषणमूर्तिरधीश्वरी विधिबलेन च तेन च निर्मिता ।। (35)

एवं स्थिते शिल्पिनि तत्र तस्मिन् रुद्राम्बिका भद्रमुखी कृतास्त्रा ।
आन्ध्रस्य राज्ञस्तनया हि साक्षात् रुद्रेण दत्तेन विराजते स्म ।।(36)

कुसुमकोमलपाणिरसौ लसत्सुमनसामयसामपि कन्दुकैः ।
सम वयो गुणशीलवती जनैः सममहो विचिखेल मनोहरम् ।।(37)

समदसिन्धुरबन्धुरगामिनी समदसिन्धुरबन्धुरगामिनी ।
शितनिजाम्बकलक्ष्यविभेदिनी शितनिजाम्बकलक्ष्यविभेदिनी ।। (38)

आरुह्यचाश्वमतिलोकमनोहरा सा
प्रोद्यन्महोग्ररिपुराजिभिरप्यगम्या।
कौक्षेयकस्य च हयस्य महोज्ज्वलाभि-
र्धाराभिराहवकलेव विजृम्भते स्म।।(39)

In Public domain. Digitization Muthulakshmi Research Academy

पुरुषापत्यशून्यो हि राजा गणपतिः स्वयम् ।
दृष्ट्वा तथा विधां पुत्रीं प्राप कोटिं परां मुदः ।।(40)

राज्यस्यभारवहनाय च दुर्वहाय प्रोद्यान्महोग्रचटुलारिभिराहवाय ।
रुद्राम्बिका चतुरुपायवती समग्रशक्तिप्रपूर्णहृदया सदयाऽलमेव ।।(41)

आखेटकौतुकवशा हि कदाचिदेषा
स्वात्मानुरूपगुणशीलवयोवतीभिः।
धृत्वा समं शरशरासनवर्मजातं
वीरोचितेन विधिना विपिनं प्रतस्थे ।।(42)

हयखुरोत्थरजः परिधूसरं श्रमवशोदितबिन्दुसमाकुलम् ।
अभिनवातपकोमलपङ्कजद्युति तदीयमुखं मधुरं बभौ।।(43)

हलाहलालोकय तावदेतदेवं यदा तत्कलकंठकंठ्यः ।
ऊचुर्लताच्छन्न शरीरवल्ल्यो मिथस्तदाऽऽयुश्शुक कोकिलाश्च।।(44)

मृगदृशां मृगया हि विमोहकृत् नगसमीपभयङ्करभूमिषु ।
अगलतागहनासु ययुर्हयैर्मृगदृशां चपलत्व दिदृक्षया ।। (45)

मदेभकुम्भोद्गतरक्तमौक्तिकच्छटा समूहान्नखरांस्तु बिभ्रताम् ।
तनौ हरीणां पटुशक्तिधावतां शरानिपेतुश्चललक्ष्यभेदिनः।। (46)

वाराहयूथं तत पल्वलोद्गतं दंष्ट्राकरालं पटुघुर्झरध्वनिः।
बाणैस्तदीयैर्दृढपुंखशालिभिः शातैस्सपत्रैर्निशितं च मारितम् ।। (47)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

दन्तावलान् मदवतोऽतिगभीरयानान्
कृत्वा धनुर्गुणरवेण पलायमानान्।
ता रेजिरे प्रथित शास्त्रदृशस्तदानीं
वन्यो गजो ननु नृपेण न वध्य एव।।(48)

एवं ता मृगयां कत्वा विद्राव्य सकलान् मृगान् ।
रजो धूसर सर्वाङ्ग्यस्तदा सिष्णासवोऽभवन् ।। (49)

सिष्णासवस्ताजलजातनेत्राः पद्माननाः कुत्रचन प्रविश्य ।
पद्माकरे तस्य मनोज्ञरूपां चक्रुः श्रियं तां महनीयशोभाम् ।। (50)

स्नात्वा वीरोचितं रम्यं वसनं परिधाय च ।
हस्तैर्धृत्वा खलीनानि पादचारेण ता ययुः ।।(51)

वनप्रियैः पञ्चमगीतगायनैः शुकैश्च पूतैः श्रुतिगीतमञ्जुलैः।
विनीतवेषैर्वटुभिश्च संकुलं शिल्पाश्रमं कश्चन जग्मुरङ्गनाः।। (52)

ऋभुत्वष्ट्रादीन् वा महित महसः केचन परे
श्रुतौ शिल्पे वापि प्रथितयशसः केचिदपरे ।
प्रियच्छात्रान् प्रेम्णा विवधविषयान् सङ्कृतिपरान्
श्रुतिप्रामाण्येन क्रमविवरणं बोधनचणाः।।(53)

In Public domain. Digitization Muthulakshmi Research Academy

आधर्वणो जगति शिल्पविदां प्रमाणं
स्थापत्यवेद इति यः प्रथितः पुराणः।
तं बोधयन्ति गुरवः प्रियशिष्यवर्गं
विश्वप्रजा हितचणं महनीयतत्त्वम्।।(54)

मददन्ति समा घनशैलशिला वटुसूक्ष्मधिया पटुटङ्कभिया।
अबलास्सबलाश्चमराः सृमराः सरयाश्च हयास्सभयाश्च बभुः।। (55)

वास्तुशास्त्रविदः केचित् ज्योतिश्शास्त्रविदः परे।
वास्तुनो ज्योतिषां बन्धं प्रवदन्ति तथापरे ।।(56)

तिर्यङ्मनुष्यमरुदादिकबिम्बसृष्टौ
पाषाणभेदमवगम्य च कालवेदी ।
आयामवृत्तपरिमाणविशेषदृष्टिः
शिल्पी भवेदिति वटून् कतिचिद्वदन्ति।।(57)

वीराङ्गनास्तान् प्रसमीक्षमाणाः खलीनकृष्णाश्वमनोज्ञवेषाः ।
अवातरन् स्वर्गपुरादमर्त्या द्रष्टुं यथा मानुषशिल्पशक्तिम् ।। (58)

अथ स्थले पल्लवपत्रसान्द्रच्छाया सनाथस्य फलैर्युतस्य ।
चूतस्य रामोजुकरोद्धृतायाः काञ्चिद्युवत्या ददृशुर्हि मूर्तिम् ।।(59)

खलीनकृष्णाश्वमनोज्ञवेषा रुद्राम्बिका तत्प्रतिमा समीपे ।
विसंज्ञकल्पा प्रतिमापरेव मग्नेव तच्छिल्पकलामृताब्दौ ।।(60)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

प्रकृतिविकृतिभेदज्ञानशून्यो हि लोको
द्वयमपि निजबिम्बं दृश्यते तद्धि चित्रम् ।
ननु किमु वनितेयं वीक्ष्य वा निर्मितेमा
मिति खलु सकलः पप्रच्छ सद्वापरस्सन् ।।(61)

दैवः सर्गो मानुषं वानुकारी दैवं सर्गं मानुषो वानुकारी ।
पृच्छामेतां को नु शक्नोति वक्तुं देवः शिल्पी चेत्युभावेक एव।। (62)

जननेषु सम्भृतफलैः सुतपोभिःस तु संकृतिर्भवतिलोकहितैषी।
यदि नैवमेतदतिविस्मयकारीपरिदृश्यते कथमयं ननु सर्गः।।(63)

एवं स्थिते सपदि तत्र विनीतवेषो
ब्राह्मप्रभा विलसनाञ्चितदिव्यमूर्तिः।
त्वष्ट्रादिशिल्पऋषिगोत्रपवित्रजन्मा
रामोजु सङ्कृतिरथागतवान् स शिष्यः।।(64)

तामात्मनिर्मितशिलाप्रतिमां च दृष्ट्वा तस्याः पुरस्थितवतीं प्रतिबिम्बकल्पाम् ।
सन्तोषविस्मयपरीतमना बभूव पाषाणमूर्तिरपरेव हि निर्विकल्पः ।।(65)

तथा समक्षं स्थितयोस्तयो स्सा परस्पराक्षिप्रसृताच्च कुल्या ।
विस्मापयन्ती कतिचिन्निमेषां स्तिरोहितां हारपटीरगौरा।।(66)

In Public domain. Digitization Muthulakshmi Research Academy

वीराङ्गना स्तास्तु ततो निवर्त्य गृहाध्वनीनाश्वजवेन तुष्टाः ।
प्रापुर्निजामेकशिलां पुरीं तां राज्ञः प्रमोदं त्वभिवर्धयन्त्यः।।(67)

तस्यां गतायां कमनीयमूर्त्यां तदीयसौन्दर्यहृतान्धचेताः।
तद्भावना भावितशिल्पदृष्टिर्जगाम शिष्यैस्थपतिस्सहान्तः ।।(68)

।।इति प्रथमसर्गः।।

अथ द्वितीयः सर्गः

अथैकदा काकतिभूमिपालस्सामन्तमन्त्रिप्रमुखैस्समेताम्।
पञ्चर्षिसप्तर्षिपवित्रगोत्रैस्तथेतरैः पौरजनैश्चपूर्णाम् ।। (1)

सभां सुधर्माणमिव प्रकल्प्य कृतार्थमात्मानमनन्तकीर्तिम् ।
चिकीर्षमाणस्सुजनान् समीक्ष्य सभासदः शास्त्रविदो बभाषे ।। (2)

लोकस्त्वयं बुद्बुदभङ्गुरश्रीर्जनिश्चजन्तोः कथितो विकारः।
यावद्भवेदत्र नरप्रतिष्ठा तावच्छरेदात्महितं हि धर्मम् ।।(3)

ये स्वार्थमुत्सृज्य परार्थशीलास्त एव लोकेऽप्यधुना लसन्ति ।
नीहारकर्पूरपटीरतारहाराच्छकीर्त्या नितरां समिध्दाः ।। (4)

वेदान्तपीयूषपराऋषीन्द्रास्त्रिवर्गसारं कथयन्ति मोक्षम् ।
तदर्थमत्यर्थमिहार्थवन्तः कुर्वन्ति पुण्यं चरितार्थकृत्याः ।। (5)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

मुमुक्षयास्मादिहमृत्युलोका द्विधित्सुरस्म्यालयमेकमस्य ।
चान्द्रीकला यस्य कपर्दभागे भक्तामृतत्वाय सुधां स्रवन्ती ।।(6)

उमापतेः कङ्कणिनो भुजङ्गैर्गजाजिनेनाम्बरिणो नगेन ।
प्रासादिनस्तेन वृषेन वाहवतः शिवस्यात्मभुवः परस्य ।। (7)

अपूर्वविज्ञानकलानिधानं शिल्पात्मकं भौतिकमिद्धरूपम्।
यो दर्शनान्मूढमनुष्यलोकं कुर्यान्महाभक्तिपरं कृतार्थम् ।।(8)

कविर्वदत्यात्मभुवं स्व वाचा तक्ष्णोति टङ्केन तमेव शिल्पी ।
उभौ तमः पूर्णपथाध्वनीनलोकस्य तेजो दिशतः स्वकीयम् ।।(9)

तत्रापि काव्यादिदमेव शिल्पं मुक्तिप्रदं पंडितपामराणाम् ।
यत्र प्रियोऽस्माकमुपेत्य देवः पुरः स्थितः पूर्णकृपासमृद्धः ।।(10)

माहेश्वरं भासुरमालयं तं रामोजुरेवार्हतमो विधातुम् ।
रवेर्ऋते भौमरसं गृहीत्वा दिव्यं पयः कर्तुमलं परः कः ।।(11)

इति प्रभुः शिल्प कलाभिलाषी तं संकृतिं प्रेक्ष्य पुनर्बभाषे ।
इन्द्रस्सुधर्मस्थितविश्वरूपं त्वाष्ट्रं यथाखण्डतपो निधानम् ।।(12)

ब्राह्मीमयीं मूर्तिममूं दधानो ब्रह्मन् भवान् शिल्पकला प्रधानः।
सभाप्रदानेन मये व पार्थं मामुद्धर त्वं शिवमन्दिरेण ।। (13)

In Public domain. Digitization Muthulakshmi Research Academy

शून्यादिदं चित्रविचित्रशिल्पं विश्वं यथोद्धृत्य स विश्वकर्मा ।
प्रादर्शयत् तद्वदतः पृथिव्या स्त्वमालयं दर्शय़ विश्वकर्मन् ।।(14)

इतीरयित्वा विरराम राजा सभासदस्साध्विति बाढमूचुः ।
रामोजुनेत्रे दरहास पूर्वा कान्तिस्सुधा वृष्टिमयी बभूव ।।(15)

तामेव मत्वा हृदि काकतीन्द्रः प्रतिश्रवं लब्धमनोरथश्रीः ।
स्वयं स्वयंभू पदतत्परत्वात् कृतार्थमात्मानमहो नु मेने ।।(16)

गाङ्गेयपात्रे कमनीयवस्त्रं स चन्दनं पूगफलैश्च युक्तम् ।
ताम्बूलमादाय नृपस्स गत्वा संकर्मणेऽदात् विधिनार्चयित्वा ।। (17)

इत्थं नृपे कुर्वति संकृतीन्द्रः शिवे प्रतिष्ठापितमात्मशिल्पम् ।
आत्मा च धन्यत्वमावाप्नुयादित्यवेत्य हृष्टोऽर्क इवात्मभासा ।।(18)

अधोत्थितस्सन् नृपतिं जगाद कृतज्ञता सूचकमन्दहासः ।
तथेति तद्भासलवेह्यपश्यन् विपश्चितः कञ्चन कालिमानम् ।। (19)

विधिर्मनुष्यैरविलङ्घनीयो यत्कर्तुकामोऽयमवश्यभावि ।
दैवादृते पौरुषमात्मशक्त्या न हि प्रतिष्ठेत फलं लभेत ।। (20)

माहेश्वरः काकतिभूमिपालस्त्रिलिङ्गदेशं परितो विचिन्वन् ।
संकर्मणा श्रेष्ठमिमं प्रपेदे रुद्राम्बिका चेतसि यः प्रविष्ठः।।(21)

In Public domain. Digitization Muthulakshmi Research Academy

साहाय्यवन्तो हरिणा च साक्षात् सुरासुराश्चामृतमाप्तुकामाः।
महाप्रयत्नेन ममन्थुरब्धिं हलाहलं प्रापुरहो विचित्रम् ।।(22)

इत्थं प्रवृत्ते पुरतः सभायामन्तःपुरस्त्रीजनमध्यसंस्था ।
रुद्राम्बिका चन्द्रकलेव तस्थौ तारावली मध्यगताऽतिहृष्टाः।। (23)

यावत्पिता सङ्कृतिमाबभाषे यावत्कृतीसंङ्कृतिराबभाषे ।
तावद्विमुग्धा हृदयेन शून्या सर्वेन्द्रियैर्लोचनयोः प्रविष्टा ।। (24)

ततः सभायाश्च सखीजनस्य कोलाहलाज्जागरिता बभूव ।
या काचिदात्मानमवेक्ष्य किन्नुहसेदिति स्वात्मनि लज्जमाना ।।(25)

शिल्पी सशिष्यः सर्वे च सभ्या राजानमामन्त्र्य ययुर्निवसम् ।
राजापि पूर्णेन मनोरथेन राज्ञः सुताऽपूर्ण मनोरथेन ।। (26)

आथात्मशिल्पामृतदिव्यवृष्टेरलौकिकानन्दरसं दधानम् ।
तच्चन्द्रमौलीश्वरमन्दिरं तं सन्तुष्टुकामः स्थपतिः प्रतस्थे ।।(27)

तत्काकतीयाधिपराजधान्या
द्विपञ्चगव्यूतिमितेऽल्पदूरे ।
कश्चित्प्रदेशं व्यचिनोत् स शिष्यः
स सङ्कृतिः शास्त्रदृशा विशुद्धम् ।।(28)

उद्धृत्य शल्यं जपहोमवास्तुपूजाकलापं च समापयित्वा ।
स स्थापयामास हिरण्यरत्नं नृपेण शङ्कुं श्रुतिमन्त्रपूतम् ।।(29)

In Public domain. Digitization Muthulakshmi Research Academy

ततोऽन्नशान्तिं च विधाय सम्यक् संतर्प्यसद्ब्राह्मण पुङ्गवाश्च ।
स काकतीयक्षितिपालमौली रामोजुमामन्त्र्य ययौ निवासम् ।।(30)

आचार्यवर्यस्य विशालशिल्पवेदात्मतालब्धमहामहिम्नः।
तस्यान्तिके सर्वमिदं जडं तन्नव्यामृतस्नातमिवातिरम्यम् ।।(31)

यावद्यदाटङ्कमधत्त शिल्पी तावत्तदा काऽपि महाप्रमाणा ।
शिला शिवस्याग्रतलाभिवर्ती भद्रो नमद्भद्रपदप्रदोऽभूत् ।।(32)

अहोनुखल्वाखुरशृङ्गमस्यरूपं जगन्मोहकरं तदासीत् ।
यो द्रष्टुमग्रेऽभवदस्य नूनं दत्वात्मचैतन्यमगाज्जडत्वम् ।।(33)

तन्नन्दिनं द्रष्टुमनिन्द्यरूपं त्रिलिङ्गदेशान्महतः समन्तात् ।
आबालगोपालमयान् प्रजास्ता मधुव्रतास्सन्मधुनेव कृष्टाः।।(34)

अथार्कमालोक्य यियासुमन्यां याम्यां विषण्णामनुनेतुकामे ।
उभे च सन्ध्ये स्वनुरागपूर्णे दिने दिने वीजयतः स्म मन्दम् ।।(35)

पुराणपत्राण्यभितो वनानि गतोऽपचिन्वन् शिशिरः क्रमेण ।
अलं चिकीर्षुः पुनरेवतानि मधुस्ततस्सत्वरमाजगाम ।।(36)

वृक्षे लतायां च तथैव यूनो रक्तानि नव्यानि तु पल्लवानि ।
मनोरथाश्च प्रबभूवुरित्थं परस्पराभ्यामुपमेयभावम् ।। (37)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

क्रमाल्लताः पल्लवपुष्पभाजो रामाविभूषाभिरिव प्रदीप्ताः ।
स्त्रीदृष्टपूर्वाऽप्यपरेव भाति प्रत्यग्रभूषाम्बरधारणेन ।।(38)

मधुव्रताबभ्रमुरन्वहं ते लतां लतायास्त्ववितृप्तचित्तम् ।
तथा हि यूनः पुरुषस्य चेतो रामास्वनेकास्ववितृप्तमेव ।।(39)

पुंस्कोकिलानां मधुरस्वरस्य महौषधिं विभ्रममंडनं च ।
विलासिनीनां खलु पर्यधत्त चूतः प्रवालं तरुणार्करागम् ।। (40)

पालाशपुष्पं मृदुकर्णिकारं वर्णेन रम्ये न तु सौरभेण ।
पद्यं नटच्छब्दशतैर्विचित्रं काव्यात्मनेव ध्वनिना विहीनम् ।।(41)

मल्लीलताः कोमलपुष्पिताग्रा जनाय भक्त्या वनमागताय ।
वसन्तलक्ष्म्या मृदुलस्मितस्य शुभ्रप्रभा रेजुरिवातिधेय्याः।।(42)

लता द्रुमं स्वं युवती युवानं मृगी मृगं पुष्पलिहं च भृङ्गी।
नवेन केनापि मनोरथेन रसोत्तरङ्गेन दिदृक्षतेव ।। (43)

पिपासया शिल्पसुधा स्रवन्त्या स्तत्संकृतेष्टङ्कविनिस्सृतायाः।
अज्ञातवेषा वनमागताथ रुद्रांबिका यौवत वेष्ट्यमाणा ।। (44)

राशीकृतां माधवभव्यलक्ष्मीं वने समग्रामभिवीक्षमाणाः।
विसस्मरुर्वर्त्मनि लब्धखेदं धत्ते नवत्वं हृदयाय तृप्तिः।। (45)

In Public domain. Digitization Muthulakshmi Research Academy

अभ्येत्य देवायतनाग्रभूमिं तद्द्वारदेशस्थितभद्ररूपम् ।
दृष्ट्वा किमप्यद्भुतमाजगाम न कस्य चित्तं परिमुह्यतेऽत्र ।।(46)

यथा यथा नन्दिनि बद्धतृष्णा तथा तथा शिल्पिनि चातितृष्णा ।
बभूव तस्या हृदयं समस्तं तत्संकृतेः शिल्पसुधाप्रपूर्णम् ।।(47)

शृङ्गे मनोज्ञे नयने ऽपि हृद्ये कर्णौ नितान्तं कमनीयरूपौ ।
सास्नास्फुरत्किङ्किणिदामबद्धा खुराः खुराः पुच्छमपूर्वमेव ।।(48)

आयामवृत्तादिमनोहरेऽत्र रेखाप्यमोघाऽभवदिद्धशोभा ।
त्वष्टारमेवाहमिमं तु मन्ये सर्वं जगत् स्वर्गमिवादधानम् ।।(49)

माहेश्वराः काकतिभूमिपालाः अयं तु महेश्वरभक्तिपूर्णः।
अनेन शिल्पेन तु शांभवेन माहेश्वरः स्यादयमेव देशः।।(50)

रुद्रौजसे रुद्रवरप्रदानात् राज्ञे प्रदत्ताहमिति स्मरामि ।
रुद्रप्रियस्यास्य पुरोऽतिवेलं मनो विकारं गमिता कथन्नु ।। (51)

उल्लेखिताश्चात्रमदीयरूपसब्रह्मचारिण्य इमा अनेन ।
बलादनुस्यूत विशेष बन्धं विवृण्वते मद्गतमस्य चित्तम् ।।(52)

पुरा जनुस्संभव एष बन्धो नो चेदहं काकति राजपुत्री ।
अयं तु शिल्पर्षि पवित्रगोत्रः क्व वोपपत्तिर्भविता कथ न्नु ।। (53)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पे तथा शिल्पिनि बद्धभावा सैवं कुमारी मनसा विचिन्त्य ।
शुश्रूषया सङ्कृतिभाषणानां रहः कटाक्षेण सखीं ददर्श ।। (54)

भो संकृते संकृतिना मयेन त्वष्ट्रानु वा निर्मित एष नन्दी ।
को वा भवान् किं फलमाप्तुकामो दधात्यसून् ग्रावसु टङ्कपाणिः।। (55)

रुद्राक्षमालं भसितत्रिपुंड्रं माहेश्वरं पूतमिमं भवन्तम् ।
तेजो महत् ब्रह्ममयं दधानं सृष्ट्वा भवत्कञ्जभवो विधाता ।। (56)

अनेन ते यौवन यौवनेन रूपेण शोभा महिमा सनाथः ।
अयं प्रदेशः कुसुमोद्गमेन नवेन चूतेन यथा वसन्तः।।(57)

तौ कौ पवित्रौ पितरावभूतामपूर्वशिल्पागमवेदिनस्ते ।
आन्ध्रीमिमां भूमिमनन्तकीर्तिं चिकीर्षितौ तीव्रतपः कृतार्थौ।।(58)

कस्याज्ञया काकति राजधान्या द्विपञ्चगव्यूतिमितेविदूरे ।
सान्द्रे वने पर्वत वेष्टमाणे तक्ष्णोषि शर्वायतनं मनोज्ञम् ।।(59)

नद्यावियुक्तेऽत्र महीध्रकूलं ग्रीष्मेऽपि सम्पूर्णजलं तटाकम् ।
निर्माय नूनं हि भगीरथोऽसि शक्तेरियत्ता भवतोऽस्ति कच्चित् ।।(60)

अमूनि सर्वाण्यबला मुखानि चैकाकृतीन्येव कुतः कथन्नु ।
या काचिदासीदधिदेवता ते नूत्नश्रियो यौवनराज्यलक्ष्म्याः ।। (61)

In Public domain. Digitization Muthulakshmi Research Academy

सञ्जात लज्जाजितमन्मथा सा सखी मुखेनैवमुवाच बाला ।
ततस्सशिल्पी दरहासपूर्वं जगाद बाले किमनेन ते स्यात् ।।(62)

कौतूहलं स्याद्यदि संशृणु त्वं शिल्पर्षिगोत्राश्चितपूतजन्मा ।
शिवेप्रतिष्ठापित शिल्पधर्मा वसाम्यहं कश्चन विश्वकर्मा ।। (63)

माहेश्वरः काकतिभूमिपालः स्वयं स्वयंभू पदतत्परत्वात् ।
उमापतेरालयनिर्मितौ मां नियुक्तवान् सोऽहममुं तनोमि ।।(64)

न केवलं शङ्कर एष देवः किं त्वत्रशिल्पागमतन्त्रहूतः ।
रौद्रीं महाशक्तिमजेयरूपां प्रदास्यते काकतिराजलक्ष्म्यै ।।(65)

रक्तिप्रदो रागवतां जनानां भक्तिप्रदो भागवताग्रणीनाम् ।
शक्तिप्रदो त्यागवतां नृपाणाम् मुक्तिप्रदो भोगजितां यतीनाम् ।।(66)

अनेन रुद्रायतनेन देशो नवो नवश्चाभिनवो नितान्तम् ।
भवेदयं प्रत्यणुरुद्रशक्तिर्वर्तिष्यते यन्त्रमहामहिम्ना ।।(67)

सर्वो जनो रुद्रबलेन रुद्रः सर्वाः स्त्रियश्चाम्बिकयाधिसाराः।
रुद्राम्बिकाध्यानपरोऽहमत्र तेनैव तक्ष्णोमि तथैव कर्तुम् ।। (68)

न मेऽस्ति कांक्षा जडजीवनेऽत्र भक्त्या शिवे शिल्पकलानुरक्त्या ।
कृत्वामरां काकतिराजलक्ष्मीं कुत्रापि शिल्पेन शुभेन रंस्ये ।।(69)

In Public domain. Digitization Muthulakshmi Research Academy

इत्यूचिवान् शिल्पिगणाग्रयायी स सङ्कृतिर्लोकहितं चिकीर्षुः।
अनादितः सङ्कृतिभिः कृतं यत् तदेव शिल्पस्य फलं हि लोके ।।(70)

वचोऽमृतं संकृतिना प्रवृष्टं मनोविकारं शिथिलीचकार ।
उदात्तशीलेन महामहिम्ना प्रेम्ना तयादर्शि स भक्तिपूर्णम् ।।(71)

असावहो कोऽपि महातपस्वी शिल्पात्मना स्वीयतपोबलेन ।
नव्यान्ध्रलक्ष्मीममरां चिकीर्षुर्महानिधिः ककतिराजलक्ष्म्याः।।(72)

अस्मत् पुरापुण्यवशेन लब्धो धन्यः पिता धन्यतराहमद्य ।
धन्याः प्रजा धन्यतमेयमान्ध्री सर्वे वयं यन्महसाभिगुप्ताः।।(73)

अनेकथैवं मनसा विचिन्त्य जगाम सा काकतिराजपुत्री ।
साकं सखीभिः स तु तत्र शिल्पी बभूव देवालयबद्धभावः।।(74)

या प्रेमभावाऽऽत्मनिचात्मशिल्पे साऽऽगत्य दृष्ट्वाद्य गते त्यजानन् ।
नाहारनिद्रादिकमादधानो दिवानिशं शिल्पपरो बभूव ।। (75)

इति स मुदितभावां राजपुत्रीमजानन्
गणपतिनरदेवस्याज्ञया काम्यया च ।
विविधसकलशिल्पैर्यन्त्रतन्त्रैस्सनाथं
शिवभवनमपूर्वं तष्टुमभ्युद्यतोऽभूत्।।(76)

।। इति द्वितीयसर्गः।।

In Public domain. Digitization Muthulakshmi Research Academy

अथ तृतीयः सर्गः

अथ स काकतिराजपुरन्दरः सितनिजातपवारणतोऽभितः।
अतितरां पृथिवीं कमनीयया शिशिरचन्द्रिकया हृततापया ।। (1)

हतसपत्नमहीपतिमस्तकस्फुरदुदग्रमहामणितेजसा ।
पटुपराक्रमभानुमरीचिना चिरमुवास भुवं परिपालयन् ।।(2)

बहुतिथे समये सति गच्छति प्रियपिनाकभुजो जरठोऽभवत् ।
पलितकेशममुं शिथिली भवत् पटु निजावयवं सचिवोऽब्रवीत् ।।(3)

अयि महन् दुहिता तव रुद्रमा निखिलकाकतिराज्यरमेश्वरी ।
भवितुमर्हति शत्रुशिरस्सु या कृतवती चरणं कमलारुणम् ।। (4)

समदशत्रुसमुद्धतवाहिनी मथनकर्मणि चंडिकया तया ।
परिलसेन्निज काकतिभूरियं कलित रुद्रमहः परिपालिता ।।(5)

सकल शिल्पकलासु रहस्यवित् स खलु सङ्कृतिरद्य महीयसा ।
निजतपो महसा हि पिनाकिनं करुणया कुरुते भवति प्रभो ।।(6)

महितसङ्कृति यन्त्रनियन्त्रितो धृतरतिः कृतसन्निधिरीश्वरः।
अयि भवन् दयया परिपालितां स विदधातु शिवां धरणीं शिवः।।(7)

चतुरुपायनुता गुरुदेवता गलितगर्वलवा च कुशीलवा ।
शरशरासनपाणिरियं महाकटिनिबद्धकृपाणविभीषणा ।।(8)

In Public domain. Digitization Muthulakshmi Research Academy

कठिनवर्मसमुन्नतबन्धुरस्फुरदुरः फलका खलु रुद्रमा ।
निखिलकाकतिराज्यरमामिमामतितरां बहुधा च विधास्यते ।।(9)

रथगजाश्वपदातिचतुर्विधप्रबलसैन्यसमाकुलभीषणे ।
रणमुखे हि विरोधिशिरोधिभिः सरुधिरैः परिखेलति कन्दुकैः।। (10)

सकलमित्रजनेष्वभंयङ्करीं निखिलशत्रुजनेषु भयङ्करीम् ।
शिवपरामभिषेचयरुद्रमां निजधरां मुदितां कुरु सप्रजाम् ।।(11)

इति निशम्य वचः सचिवस्य तन्नृपतिरापमुदं परमां तथा ।
जनपदेषु पुरेषु च घोषणध्वनिरभूद्धलयन् विदिशो दिशः।।(12)

महितपुण्यसमुद्रनदीजलैः शुभदिने महतां च पुरोधसाम् ।
सपुलकं तनुजा धरणीभुजा निगममन्त्रवचोऽभिरषिच्यत ।।(13)

समधिगम्य पितुर्जगतो भरं पृथुलमन्ध्रमहीशतनूभवा।
शरदमेत्य घनच्युतकौमुदी विलसति स्म नवामिव चागताम् ।। (14)

परिचितोऽपि हितोऽपि बिभाय तां समभिभाषितुमाप्तुमहो भृशम् ।
निकटवर्तिरिपावपि कोमलस्मितमुखीं नवचन्दनशीतलाम् ।।(15)

प्रियहिता विमला शिवदेववागकलुषां सफलां च चकार ताम्।
मधुरमार्तिहरं च यथौषधं स हि भिषक् स हि मन्त्रकृदग्रणीः।।(16)

In Public domain. Digitization Muthulakshmi Research Academy

परिहरन्नघलेशमपिस्वयं हितकरे निजकर्मणि नोदयन् ।
त्रिकरणेषु समेषु सुहृद्गणः सुकृतभाजमसेवत रुद्रमाम् ।।(17)

दिनदिनक्रमवर्धनशीलता गरिमया द्रविणं प्रविभास्वरम् ।
नतमहीपतयो जनता च यत्करमदुर्विधिवन्निजकाम्यया ।।(18)

हरिहरश्चमुरारि महीपतिर्यदभिवीक्ष्यनितान्तमसूयया ।
कलुषितौ चकितौ च तथाभवन्निखिलराष्ट्रमनन्त समृद्धिमत् ।।(19)

परिखयाऽऽततयाऽतिगभीरया परिवृतैर्वरणैः किल सप्तभिः।
समधिगम्यरिपुव्रजदुर्गतां तदभवत् पटुदुर्गमहो भृशम् ।। (20)

स्फुरदमोघशितायुध वर्मभृत्पटुसमुद्धतशात्रवदुस्सहम् ।
रथगजाश्वपदातिभयङ्करं शिवकरं तदभूत् सबलं बलम् ।।(21)

प्रकृतिरञ्जनशत्रुविभञ्जने जनुषि पूर्वमदर्शित तया नु किम् ।
यदि न सा त्वबलान्तरहो बहिः कथमुपप्लुतिमित्थमियं तरेत् ।।(22)

मधुभरेक्षुमती कलमाकृतिर्मधुरदुग्धसमन्वितगोमती।
विलुभती नुदती खलु रुद्रमामथ समग्रगुणाशरदागता ।।(23)

कुमुदुनी सचिवः खलु चन्द्रमा मधुरतन्मुखकान्तिविनीतिमान् ।
नवपटीरपरागविसारिभिः पुलकितं विदधे भुवनं करैः।।(24)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

दिवि जनिस्समभूद्धटजन्मनो भुवि भियोऽपि च तत्परि पन्थिनि ।
समुदियाय विनिर्मलता घने निज जने च वने च दिने दिने ।।(25)

विकचकाशतटीषु नदीषु सत्कुमुदवत्सु विनिर्मलवारिषु ।
अविरतं रमतेस्म नवागमा महितकाकतिराज्यरमाऽसमा ।।(26)

विकसिते कमले मधुलिप्सया मधुलिहो दधते स्म परां स्पृहाम् ।
विलसितेषु यशस्सु महीभृतो दशदिशो बहुधा परिधित्सया ।।(27)

महितसङ्कृतिटङ्कविनिस्सृतस्फुरणशालिवृषे विजिगीषया ।
तदृषभा दधिरे निनदं भृशं शितविषाणखुरेण तटोद्रुजाः।।(28)

कलरवेण कृपीटपतत्रिणां मधुरझंकृतिर्भिर्मधुपायिनाम् ।
उपवनानि वनानि विलासिनां श्रमनुदान्यभवन् युवतीवताम् ।।(29)

मदमुचः करिणो गतकर्दमात् विपथता सुपथत्वमविद्यत ।
तनुतराः स्रुतयोऽपि ययुत्सया निगदिता इव तत्सुभटाः कृताः।।(30)

विशदशारदनिर्भरचन्द्रिकाधवलभास्वरपुण्ययशस्विनी ।
निरतमार्तवसौख्यवतो जनान् करुणयाऽऽन्ध्रमहीपसुता पपौ ।।(31)

अथ स देवगिरेःपतिरुज्ज्वलप्रधनदुर्गमवर्त्मनि पंडितः।
हरिहरं च मुरारिमलोभयत् कुटिलनीतिजितात्महितावुभौ ।। (32)

In Public domain. Digitization Muthulakshmi Research Academy

अबलया च कयाचिदिमे वयं सुबलिनो बलिनो विगतत्रपाः।
कलुषिता निकृताः परिपूरिता मलिनयाऽसितयाऽपसमज्ञया ।।(33)

इति स देवगिरेः पतिरुन्मदद्विपतुरङ्गमसैनिकगर्वितः।
अभिययौ पटु काकतिवाहिनीं शिवबलामबलामिति रुद्रमाम् ।।(34)

विविधसैन्यसमुत्थितरेणवो रुरुधिरे परितो नभसस्तलम् ।
पृथुसमुत्कटदन्तिमदाम्बुभिस्तलमकारि भुवः किल पङ्किलम् ।।(35)

निखिलकाकतिराज्यजयैषिणः समधिगम्य चरैः परिपन्थिनः।
सरयमेत्य पुरं शिवमन्त्रिणे निजगदे चटुलारिकृतागमः।।(36)

अभिनिशम्य वचः सचिवाग्रणीः कुटिलनीतिविदां परिपन्थिनाम् ।
हरिहरस्य मुरारि महीपतेर्निखिलवृत्तमपश्यदनन्तधीः।।(37)

शशिकलाभरणे निखिलेश्वरे भजनकामनया खलु रुद्रमा।
गतवती पृथुभंडनपंडिताः समभियांत्यरयो विभियोऽधियः।।(38)

इति विचिन्त्य चमूपति पुङ्गवान्निखिलकाकतिराज्यहितैषिणः।
रभसमाह्वयदाप्तचरैस्तदा शिवपतिः सचिवः सचिवाग्रणीः।।(39)

अथ निशाम्य सपत्नकृताहवप्रबलयत्नमरीन् कृतसन्निधीन् ।
विधिवदादिशदान्तरबाहिरे सपदि काकतिदारुणि रक्षणे ।।(40)

In Public domain. Digitization Muthulakshmi Research Academy

यदि विभुः कृतसन्निधिराहवे प्रबलशत्रुवधो न यशस्करः।
स तु परोक्षमकारि हितैर्हि चेदिह परेऽपि स एव शुभङ्करः।।(41)

असुषु नश्वररूपिषु कांक्षया न भवितुं भवतां महतां वरम्।
प्रभुपराय नमन्ति जगन्ति तं त्रिसमयेषु नुवन्ति यशस्विनम् ।।(42)

अपि च वः कथनं न ममेप्सितं प्रभुपरावयमत्र परेऽपि च ।
सुकृतदुष्कृतकर्मसु भूभृतो वयमिहापि परे समभागिनः।।(43)

दुहितरं तु विहाय विशांपतिः दिवमगाच्छुभकर्मसमार्जितम् ।
गणपतेर्वयमत्र विशांपतेः ऋणपरिष्करणं करवाम तत् ।।(44)

अपि च नास्त्यधुना पुरि रुद्रमा गतवती भजनाय पिनाकिनः।
तदवलम्ब्य जिगीषव आगताः समदशत्रुमहीपतयोऽभयम् ।।(45)

यदु धराधिपतिः खलु कुत्सितो हरिहरं च मुरारि मलोभयत् ।
कुटिलनीतियुतास्त्रय आगता रथगजाश्वपदातिसमाकुलाः।।(46)

विशद शारदनीरदपारदद्युतियशोऽन्ध्रमहाधरणीभुजाम् ।
भवतु नो मलिनं प्रबलारिराण्मदतुरङ्गखुरोत्थितरेणुना ।।(47)

मुकुलयन्परपार्थिवयोषितां पवनचञ्चलकैरवलोचने ।
भवतु नो शिशिरः स पराक्रमो रिपु समुत्कट दन्तिमदाम्बुना ।।(48)

In Public domain. Digitization Muthulakshmi Research Academy

इति वदन्तमरीनधिकृत्य तं पुलकिताः पृतना पतयोऽभृवन् ।
सचिवशेखरवैरिशिरोऽधिभिर्बलिविधिं करवाम जयश्रियः।।(49)

भवतु नो भवतु त्विह रुद्रमा कृतममित्रजये परिशङ्कया ।
असुमरुद्ग्रसनाय विरोधिनामसय एव भृशं प्रसरन्ति नः।।(50)

विमतपार्थिवसैन्यविभञ्जने दिशतु नोऽनुमतिं सुमतिर्भवान् ।
इति तथेति ततोऽनुमता गता स्तत चमूपतयो यतने रताः।।(51)

प्रतिपदं पुरि रक्षणकर्मणे प्रणिहिताः कुशला न तु केवलम् ।
अपि च राष्ट्रमकारि सुरक्षितं हितचरैर्निभृतं गमने कृते ।।(52)

कुटिल देवगिरिप्रभुरागतो हरिहरं समुरारिमिहानयन् ।
निखिलकाकतिराज्यजिगीषया निभृतमेतु पुरं भवती द्रुतम् ।।(53)

इति चरं नयति स्म रयान्वितं प्रियहितं निभृतं प्रति रुद्रमाम् ।
सचिवराण्मणिनोक्तमसंशयं निगदितं किल साञ्जलि तेन ताम् ।।(54)

प्रलयताण्डवकेलिकुतूहलिन् हलहलिन् कुरु मे विजयं प्रभो।
गदितमित्थ मथोत्पदया तया सितदृशा धृतकोकनदप्रभम् ।।(55)

अथ रुरोद विपक्षबलं रथद्विपतुरङ्गपदातिभयङ्करम् ।
वरणसप्तकमन्ध्रमहीभुजां लसितकेतनमेकशिला पुरम्।।(56)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

पटुकवाटविपाटनकर्मणि प्रणिहिताः किल हस्तिपकैर्गजाः।
स्वरुसमैर्निशितैरदनैर्दृढं पृथुलकुंभतलैः प्रहृतं च तैः ।।(57)

समधिरुह्य भटैः पटुघोटकान् ददृशिरे विवराण्यभितो वृतिम् ।
अहितदुर्गमदुर्गजयैषिणां प्रधननीतिविदामिदमुत्तमम् ।।(58)

समधिरोहणकर्मपरायणैः कतिपयैः पदिकैर्वरणे बहिः।
भृशमभावि तथा रथिभिः परैस्त्रिविधसैन्यमरक्षि यथाऽभयम् ।।(59)

इति रिपौ कृतवृत्यभितो वृतिं प्रभुपराः कुपितान्ध्र महाभटाः।
क्षुधितकेसरिणो गजघींकृतेः श्रुतिवशादिव सत्वरमुत्थिताः।।(60)

विपुलगोपुरभागगृहाभृशं प्रहरणैर्निभृतं परिपूरिताः।
तत विशालतराट्टगृहेषु स प्रहरणैः सुभटैर्निखिलैः स्थितम् ।।(61)

वरणसप्तकमध्यधराद्विषामसुमरुद्ग्रसनाय रुषोद्यता ।
निशितकण्टकशल्यजलैर्युता प्रभुपरादृदयादिव चोदिता।।(62)

इति यदा स्थितमेकशिलापुरं प्रणधिभिर्ग्रदिताद्वचनात्तदा ।
निभृतमार्गगतैःकतिचिन्नृपा रभसमाययुरन्ध्रजयैषिणः।।(63)

एकतो रिपव एकतः पुरी चैकतो नृपपरा हितैषिणः।
एकतः श्रुतवती च रुद्रमा सर्वशक्ति पटुदैवमेकतः।।(64)

In Public domain. Digitization Muthulakshmi Research Academy

क्षुभ्यन्तश्चतुरर्णवा इव नदत्कल्लोल मालाविलाः
संकृद्धाः ककुभः प्रतीपपवनादुद्यद्रजो दूषिताः।
धर्मग्लानिरुषाधृतप्रहरणा दीव्यत्कराः शूलिन-
श्चक्रुस्तीव्रमहोभयानकरसं न ज्ञात पाकाद्भुतम् ।।(65)

।। इति तृतीयसर्गः।।

अथ चतुर्थः सर्गः

स दीक्षितो लोकहिताय विश्वशिल्पात्मना स्वीयतपोबलेन ।
पिपेश माहेश्वरमालयं तं लोकोत्तरं शिल्पकला निधानम् ।।(1)

कृतार्थता लब्धमहासुखेन रामोजुना निश्वसितं प्रगाढम् ।
आत्मानमन्ध्राधिपमप्यपश्यदगाधसंसारमहाब्धितीर्णम् ।।(2)

प्रतिष्ठितस्तेन च लिङ्गरूपी शुभङ्करः काकतिराज्यलक्ष्म्याः।
स्थापत्यविज्ञानसुधोद्धृतेन यन्त्रेण संस्थापितरुद्रतेजाः।।(3)

मृतं नृपं तस्य सुतां च राज्ञीमसूयया दर्पितचित्तवृत्त्या ।
प्रत्यर्थिनामागमनं च सैन्यैर्निरोधमन्ध्राधिप राजधान्याः।।(4)

रुद्राम्बिका मन्त्रबलेन देशहितेच्छया राष्ट्रमरातिदुर्गम् ।
रुद्राम्बिकायां च तथा च देशे सर्वप्रजानामतितत्परत्वम् ।।(5)

In Public domain. Digitization Muthulakshmi Research Academy

सर्वानिमान् सङ्कृतिरात्मधर्मनिर्वोढुकामः किल नाध्यगच्छेत् ।
पश्चाब्धमेकाग्रतया चरित्वा तपस्ततानालयमामरं तम् ।।(6)

स्थापत्य यन्त्रागतदिव्यशक्त्या भीमेन रुद्रेण विनिर्मितेन ।
त्रिलिङ्गदेशं परितो हि तत्र जडाजडं नव्यबलातिभीमम् ।।(7)

अत्रान्तरे काकतिराजधानी महबलैः शत्रुबलैर्निरुद्धा ।
कृतान्तपाशोपहतात्मबुद्धे राशीविषे रज्जुरिति भ्रमो हि ।।(8)

पुरः कुजं ते रिपवः प्रयाता नैकोऽपि तत्रास्ति समीक्ष्यकारी ।
नाधीत्य शास्त्रं न च वीक्ष्य देशं कालं च पात्रं च करोति मूढः ।।(9)

निन्दन्ति दैवं कतिचिद्विमूढाः स्वयं तु ये पौरुषमाश्रयन्ते ।
दैवादृते पौरुषमात्मशक्त्या कथं प्रतिष्ठेत फलं लभेत ।।(10)

सत्येन शौचेन दयावता च शीलेन धर्मार्थमभीतचित्तः।
यो युध्यते क्षत्रपदार्थगामी दैवं सदा रक्षति तं विशुद्धम् ।।(11)

उदन्तमासाद्य नितान्तरोषकषायितारक्तमुखारुणाक्षी ।
निवर्त्य सैन्येन मितेन वेगात् रुद्राम्बिका प्राप पुरं परात्तम् ।। (12)

व्यालीव निश्वस्य परैः परीतं पुरं समुद्वीक्ष्य समीपमेत्य ।
दध्मौ स्व शंखं युधि चण्डिकेव जिघांसुरीक्षाभिररातिसैन्यम् ।।(13)

In Public domain. Digitization Muthulakshmi Research Academy

आध्मातशंखामधिगम्य राज्ञीं रुद्रांबिकां दुर्गगता हि योधाः।
सामन्तभूपाश्च विवृद्धमोदसमृद्धयो दध्मुरतोऽविलम्बम् ।।(14)

अन्योन्यसंज्ञामधिगम्य सर्वे जजृम्भिरे शत्रुवरूधिनीनाम् ।
पश्चात् पुरश्चान्ध्रमहाभटास्ते दवानला वा चटुलाटवीनाम् ।।(15)

आचार्यवर्यस्य विशलशिल्पवेदात्मतालब्धमहामहिम्नः।
तत्सङ्कृतेर्यन्त्रबलेन तेन महान्ध्रयोधा महसा सनाथाः।।(16)

रथं गजं वाजिनमापपत्तिं रथो गजोऽश्वः सममेव पत्तिः।
क्षणेन युद्धं तुमुलं बभूव राज्ञां जिगीषा महतां विभूषा।।(17)

गदी कृपाणी मुसली च धन्वी समं प्रतिस्पर्धिनमापसर्वः।
मैत्री विरोधौ महितौ भवेतां समानशीलव्यसनायुधानाम्।।(18)

तदार्थचन्द्राशुगपातवेगात् पपात कस्यापि भटस्य शीर्षम् ।
दन्तैश्च संदष्टतराधरोष्टं कषायितारक्तमुखारुणाक्षम्।।(19)

गदाप्रहारेण विभिन्नकुम्भात् परिस्सृतं शोणितमाचकासे ।
कस्यापि नागस्य नगस्य शृङ्गाद्विनिस्सृतप्रस्रवणेन तुल्यम्।।(20)

द्वौ सादिनौ सादितशत्रुयोधावन्योन्यमभ्यद्रवतां समानम् ।
निकृत्तशीर्षौ च परस्पराभ्यां क्रबन्धिना वासतुरेव तत्र।।(21)

In Public domain. Digitization Muthulakshmi Research Academy

शिल्पश्रीः

यथाकथञ्चित्पतयालुदेहं विक्रीय घोराहवमध्यभागे ।
अनश्वरं स्वर्गसुखं लभन्ते कीर्तिं च ते धन्यतमा हि योधाः।।(22)

कामं विना कर्म करोति योधो निस्सङ्गता बुद्धिविशेषपूतः।
परार्थमात्मानमनीकवह्नौ जुहोत्यवश्यं फलदायि दैवम् ।।(23)

नो चेदियं सत्यवतीह वाणी किमर्थमत्रेन्धनतां प्रयान्ति ।
त्यागो यदि स्वं न लभेत पाकं शास्त्रस्य वैयर्थ्यगतिर्ध्रुवा हि।।(24)

अत्रान्तरे वीररसाधिदेवी क्रुद्धा विचक्राम सपत्नसैन्ये ।
मदेभयूथे कुपितेव सिंही रुद्राम्बिका क्रूरकृपाणपाणिः ।।(25)

रक्तोत्पलानां द्युतिरुज्ज्वलेव यतो यतो दृष्टिरियाय तस्याः।
ततस्ततोऽदर्शि कबन्धपङ्क्तिर्द्विषां तुरङ्गद्विपपत्तिनः सा ।।(26)

हयस्य हेषा रथनेमि शब्दो गजस्य घीङ्कार रवो गभीरः।
जयेति शब्दः पदिकस्य यावत् कृपाणधारा न विजृम्भन्तेऽस्याः।।(27)

क्वचिद्धये क्रूरकृपाणपाणिः क्वचिद्गजे भीषणभल्लहस्ता ।
क्वचिद्रथे बाण निषङ्गचापा सर्वत्र सैकापि बभावनेका ।।(28)

प्रगृह्य शुण्डां द्विरदं बभञ्ज हयं गृहीत्वा पृथु केसराणि ।
भल्लेन वेगात् पदिकं शिरोधौ करालमानिर्गत रक्तधारम् ।।(29)

In Public domain. Digitization Muthulakshmi Research Academy

ततो महादेव नृपःसरोषमभ्यद्रवत्तामधिरूढहस्ती ।
साप्युत्कटानेकपगामिनी तं प्रत्यग्रहीद्धृष्ट महान्ध्रसैन्यम् ।।(30)

गदां विचिक्षेप बलाच्छिताग्रां लक्ष्यीकृतोन्मस्तकमन्ध्रराज्ञीम् ।
महायसीं तां शकलीचकार मृत्पिंडतुल्यं गदयैव राज्ञी ।।(31)

ततः कृपाणं परिगृह्य दर्पान्मुधा गदाभीषणसम्प्रयोगः।
चिक्षेप तां तीव्रतरं सरोषं कृतास्त्रतालब्धमहायशस्कः।। (32)

क्षणात्ततोरुद्रमया प्रयुक्तः खड्गस्सपक्षश्च फणीव वेगम् ।
तं पातयामास समं तदीयं धृताङ्कुशं हस्तिपकं जघान।।(33)

पादाभिघातात्कुपितः फणीव श्वसन् महादेवनृपः सवेगम् ।
आरुह्य कस्यापि रथं सचापो वृषेव वर्षं व्यसृदच्चरौघम् ।।(34)

निवार्य तं सूतमिषु द्वयेन षड्भिस्तुरङ्गौ गुण केतने च ।
एकैकबाणेन निपात्य शत्रुं नृपाग्रणीं तं विरथं चकार ।।(35)

कर्तव्यता मूढमति स्स राजा व्रीडाभिभूतं स्वबलं च कुर्वन् ।
पराजितात्माऽपगतः समीकात् स्त्रियोऽबला इत्यनृतं विजज्ञे ।।(36)

विजृम्भितेऽस्मिन् तुमुले समीके रुद्रांबया रुद्रबलात्तशक्त्या ।
जिता हि सर्वे परपन्थिनस्ते पलायनं चक्रुरहो विचित्रम् ।।(37)

In Public domain. Digitization Muthulakshmi Research Academy

तथाऽबला रुद्रबलेन बाला महाबलं शत्रुबलं विजित्य ।
निचिक्षिपेऽनुग्रहमात्मवत्ता महात्मनां सन्निहिता सदैव ।।(38)

राष्ट्रैः सह स्वैः प्रविमुच्य शत्रून् जयेच्छलत्केतनचारुभूषाम् ।
प्रापत्पुरं सैकशिलां महान्तः स्युर्निग्रहानुग्रहयोः समर्थाः।।(39)

प्रतीपभूपालकिरीटरत्नप्रभावलीरञ्जितपादपीठा ।
जयेच्छलत्केतनमध्यवर्तिवाराहमुद्राकुलितारिपीठा ।।(40)

नीहारकर्पूरपटीरतारहाराच्छकीर्तिस्फुरिताचलान्ता ।
प्रवृद्धसम्मोदमदान्ध्रदेशप्रजाट्टहासोज्ज्वलदिग्दिगन्ता ।।(41)

रथाङ्गदन्तावलवाजिपत्तिपदाहताचूर्णितशत्रुशेषा ।
आशीविषस्पर्धिकृपाणधारा सम्पातदत्तारिनृपालशोषा ।।(42)

किरीटहाराङ्गदबाणवर्मकृपाणकोदण्डविचित्रभूषा ।
सखीजनानन्दविधायिराजच्छृङ्गारवीराद्भुतचारुवेषा ।।(43)

रथाङ्गकोदण्डकृपाणशंखपद्मादिरेखाञ्चित दिव्यहस्ता ।
संध्यानटच्चन्द्रकलाकलापदार्चनाभावभरप्रशस्ता ।।(44)

पुराणजन्मान्तरलब्धपुण्यप्रभासमासादितशिल्पभावा ।
गोदवरीदिव्यतरङ्गवातपूतान्ध्रदेशाधिगतात्म सेवा ।।(45)

In Public domain. Digitization Muthulakshmi Research Academy

रुद्राम्बिकेन्दीवरलोचनानां दिने दिने कृत्यवतां जनानाम् ।
मुखेन्दुनिष्यन्दिसुधास्मितेन शुभेन शुभ्रेण मुदं विधात्री ।।(46)

स्वीयं जयं संकृतिशिल्पतेजः प्रभा प्रभावाधिगतं विचिन्त्य ।
आनीय तं काकतिराजधानीं विधातुमर्चां निरचेष्ट चित्ते ।।(47)

अत्रान्तरे राजसुताभिलाषाच्छुश्रूषया सङ्कृति भाषणानाम् ।
पप्रच्छ तं या प्रथमं शुभाङ्गी सैकां सखीं कृत्यवतीं गृहीत्वा ।। (48)

जगाम विस्रब्धमतीव यत्र तक्ष्णोति शर्वायतनं स शिल्पी ।
स्निग्धो जनः स्नेहवशेन मित्रप्रेयोऽर्थमात्मानमलं च होतुम् ।।(49)

निष्कण्टकं राज्यममित्रभूपा नेमुश्शिरांसि प्रविमुच्य लज्जाम् ।
अङ्गेषु लावण्यमयेषु मन्दं जागर्ति देवः खलु पुष्पधन्वा ।।(50)

मत्वेति सा काकतिराजपुत्रीं जगाम तस्याहितकाम्ययैव ।
प्रेमान्धबुद्ध्याऽहितमप्यवश्यं हितं विजानाति विधेः प्रभावात् ।।(51)

सख्या समं सा द्रुतमाप यत्र रामोजुरानन्दितचित्तवृत्तिः।
पुरा त्रिवारं स्थपतेः पुरस्तात् जडीकृतां तां मनसाभिवीक्ष्य ।।(52)

मन्दाकिनीपुण्यरवेण बुद्धैर्बालेन्दुरेखामृतवर्धमानैः।
द्विसन्ध्ययोः स्वैः कलगीतपाठैः पतत्रिभिः संभरिते स्तुवद्भिः।।(53)

In Public domain. Digitization Muthulakshmi Research Academy

मल्लीमुखोत्फुल्ललतान्तगन्धैः सुगन्धिना बन्धुरमन्थरेण ।
शीतेन वातेन समुत्तरङ्गकासारवीचीपृषतैः परीते ।। (54)

मृत्युञ्जयाराधनतत्पराणामातिथ्यरूपं सुकृतं चरद्भिः ।
फलैर्युतेस्वादुभिरासमन्तादितः परं प्राप्तुमिवाधिजन्म ।।(55)

वनं मनोज्ञेऽभिदिशं विशालसालावृतद्वारतया निबद्धम् ।
द्वारैस्त्रिभिर्युक्तमथाष्टकोणं स्पृशन्तमभ्रं शिखरेण दर्पात् ।।(56)

भागेष्वभिव्याप्तमपारसारस्निग्धोपलैर्निर्मितरम्यवेदिम् ।
आपादचूडं बहुचित्रशिल्पन्यस्तैर्लतापद्ममुखैर्मनोज्ञम् ।।(57)

पदे पदे निर्मितरम्यकोणकलाविलासेन विराजमानम् ।
विन्यस्तया केवलरेखयापि सजीवया सार्थकया स्फुरन्तम् ।। (58)

मुखे तु पूर्वाभिमुखे महेन्द्र नीलोज्ज्वलश्यामलभास्वरेण ।
सर्वाङ्गशोभामहिमास्पदेन भद्रेण भद्रं दधता सनाथम् ।।(59)

अग्रे प्रतिद्वारमपूर्वनाट्य कलाकलापेन महोज्ज्वलाभिः।
स्त्रीभिः कृतस्वागतमप्सरोभिः यथेन्द्रहर्म्ये महिमास्पदाभिः।।(60)

अष्टासु कोणेषु मृगेन्द्रदन्तिमुखादि सत्वोत्तम पूर्वकायैः ।
सत्यैर्यथाशिल्पबलाल्लसद्भिर्धृतं यथा दिग्गजराजकुम्भैः ।।(61)

In Public domain. Digitization Muthulakshmi Research Academy

अन्तश्च नीलोत्पलसान्द्रकान्तिजुषामहास्तम्भवता सनाथम् ।
नानाविधानूनलतावितानकलाकलापेन च मण्टपेन ।।(62)

पदे पदे पूतपुराणगाधा शिल्पैरनेकैरभिभासमानम् ।
पापात्मने मौढ्यवतेऽपि पुंसे भक्तिं विनीतिं च भृशं दधानम् ।।(63)

दम्भोलिसारेण महेन्द्रनीलभासामनोज्ञेन महोन्नतेन ।
द्वारेण सुस्निग्धतरैरनेक कोणैर्युतेनान्वितगर्भगेहम् ।।(64)

अपूर्वकैलासगुहापवित्रे गर्भालयेचित्रविचित्रशिल्पे ।
दिदृक्षवे भक्तजनाय पुण्यात् सर्वाङ्गरोमाञ्चविधानदक्षे ।।(65)

शुभे प्रतिष्ठापित दिव्यलिङ्गं सर्वैर्नमस्कार्यमहाप्रभावम् ।
पुराजनुः कोटिशतैः कृतेन जनस्य पुण्येन भुवि प्रदीप्तम् ।। (66)

माहेश्वरं भासुरमालयं तं रामोजुना सङ्कृतिना परेण ।
पञ्चाब्धमत्युग्रतपांसि तप्त्वा कृतं लसंतं वनिता ददर्श ।। (67)

कासारवीचीकणशीतवातनीताखिलाध्वश्रमया सुदत्या ।
अमन्यतात्मापरमं कृतार्थस्तथाविधेनालयदर्शनेन ।।(68)

तत्रैव कुत्रापि रसालसालच्छायां सुखे नाध्यवसत्स शिल्पी ।
बाल्यात्परेणापि दशान्तरेण पूतं मनो यस्य हि नो विचक्रे ।।(69)

In Public domain. Digitization Muthulakshmi Research Academy

अथ सुमतिरपारस्फारशिल्पाभिरामं
जनिशतकृतपुण्ये नैव संदर्शनीयम् ।
विधुशकलकलापं पूजयन्तं नितान्तं
विनय विनमिताङ्गी तं प्रणम्योपतस्थे ।।(70)

।।इति चतुर्थसर्गः।।

अथ पञ्चमः सर्गः

अथ तामभिवीक्ष्य सङ्कृतिर्धवलस्निग्धतरेण चक्षुषा ।
मधुरं वदति स्म भारती मयि भद्रेऽत्र निषद्यतामिति ।।(1)

उपविश्य नतेन चक्षुषा भयभीतामिव लज्जया स्थिताम् ।
गदितुं सकुतूहलां तदा विगणय्याभणदात्मवान् शनैः।। (2)

अयि सोदरि काऽसि वा कुतः किमु वा स्वागमनप्रयोजनम् ।
रहिते भवति प्रयोजने स तु मन्दोऽपि न हि प्रवर्तते ।।(3)

भवतींस्तु यदा कदाऽपि वा ध्रुवमद्राक्षमिति स्मृतिर्हि मे ।
मयि भामिनि शिल्पिनीदृशे दरमुत्सृज्य विधेहि चादरम् ।।(4)

इति वाचमुवाच सङ्कृतिर्दरविस्मेरमुखेन हारिणीम् ।
स्मितपूर्वकमेव भाषते महनीयः खलु सर्वदा समम् ।।(5)

In Public domain. Digitization Muthulakshmi Research Academy

अहमत्र महामते पुरान्महतोऽन्ध्राधिप पालितादितः।
ससखी भवतो दिदृक्षया कुतुकेनागममेव केवलम् ।।(6)

परिपाल्य चिरं महामतिः स गतः काकतिधारुणीपतिः।
यमिमाः परिपालिताः प्रजाः पितरं भ्रातरमेव मन्वते ।।(7)

हितमेव हि दुष्टचेतसा महितानामपि कुर्वती स्वयम् ।
समदुःखसुखेन चेतसा दुहिता शास्ति गतस्य रुद्रमा ।।(8)

अधुना महनीयया तया बहिरन्तस्सुखमेत्य सप्रजा ।
धरणी भरणक्षमामिमां प्रविसूते सकलार्थसम्पदः।।(9)

इत एव हि पूर्वमत्र यो रिपुरागात् बलवान् जिगीषया।
सबलः स पराजितोऽभवद्विभिया नीतिविदा तया पुनः।।(10)

यदिदं मम चोदितं वचो यदि जानाति भवांस्तु तत्त्वतः ।
भवतां दयया प्रसादितं महतां शिल्पकला तपस्विनाम् ।।(11)

अपिचैकमिदं परं रहः कथनीयं भवतेऽस्ति मे पुरः।
सुविनीतिमता हि चेतसा सभिया संभृतलज्जया मया ।।(12)

त्वयि शिल्पिनि बद्ध भावना मम राज्ञी चरितार्थ जन्मनि ।
असुभिः करणीयमद्य मे पुरतः सा परिदृश्यते सखी ।।(13)

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमं मृगया विनोदिनी तव शिल्पाश्रममेत्य भामिनी।
अभिवीक्ष्य जडीकृताऽभवन्नुत शिल्पं च भवन्तमुत्तमम् ।।(14)

अपि चान्ध्रमहीपतेस्सभा भवने त्वां विधिवत्प्रपूजितम् ।
पुरतः समवेक्ष्य सा गता ध्रुवमत्यन्तमतीन्द्रियं सुखम् ।।(15)

मनुते हि पुराणवासना परतन्त्रो मनुजस्तथा तथा ।
ननु कारणमत्र केवलं बलवद्दैवमिति प्रचक्षते ।।(16)

तव नन्दिनि शिल्पदर्शनच्छलनात्काकतिराजनन्दिनी ।
अभिगम्य मुखेन मे तदा प्रतिवाक्यार्थमपृच्छदेकदा ।। (17)

अधुना भवता स्मृता भवेन्मम सा प्राणसखी हि रुद्रमा ।
दुहितामृतकाकतिप्रभोः सकलान्ध्रक्षितिपालनक्षमा ।।(18)

इयता वचनेन मे सखी गतमावेदितमेव सर्वथा ।
मनसोऽप्यतिगुप्तमेकदा प्यनभिव्यक्त मितः पुरा क्वचित् ।।(19)

इति वाचमुवाच हारिणीं दुहितुः काकातिभूभृतः सखी ।
स तु मित्र मतोऽभिधीयते यत आत्मैव सदा गुणीकृतः।।(20)

अथ संकृतिरात्मवान् सखीं ससखीं काकति भूभृतस्तदा ।
प्रविमुच्य तथेत्यनेकेथा मनसैवं कृतवान् महामतिः।।(21)

In Public domain. Digitization Muthulakshmi Research Academy

हतधीः कुरुते हि संसृतौ खिलशीलं निखिलं ध्रुवेच्छया ।
कृतधीस्तु तदेव मन्यते सजुगुप्सं जलबुद्बुदोपमम् ।।(22)

वनिता जनता च भास्वरं द्रविणं सर्वमनात्मवत्तया ।
मधुराकृति तस्य भासते य इमां भव्य तयाऽनुमोदते ।। (23)

अनुधावति मूढचेतनो मृगतृष्णा तरलां तु संसृतिम् ।
न तु जातु सुखं सपद्यते सिकता तैलवती कथं नु किम् ।।(24)

मधुमासि वसन्त कोमलं मृदुबालातपनिर्भरारुणम् ।
मृदुलं नवचूतपल्लवं शशिरे जर्जीरतं विशीर्यते ।।(25)

मधुरैः कलकंठकूजनैः किमपि श्रोत्र सुखामृतं ददत् ।
नवपल्लवखादिकोकिलो म्रियते कापथनिर्जितैः परैः।।(26)

तपनातपकर्शितं जगच्छिशिरस्पर्शनशालिभिः करैः।
परितोषणकारिणेन्दुना म्रियते लक्ष्मसरोजशोषणम् ।।(27)

खरभानुकठोरभानुभिर्लपितं विश्वमिमं प्रमोदयन् ।
मलयागतमन्दमारुतः क्वचिदुन्मीलयति प्रभञ्जनः ।। (28)

नवबन्धुरगर्भनिर्भरैर्मृदुपत्रैः सुकुमारकेसरैः।
जगतां नयनामृतं स्रवत्कुसुमं भ्रश्यत एव पेशलम् ।।(29)

In Public domain. Digitization Muthulakshmi Research Academy

शिखिचातक मोदितागमो जन जीवातुभिरब्दिरञ्चितः।
नवकोमलनीलमोहनो जलदो गर्जति मुञ्चति स्वरुम् ।।(30)

मधुरैः कलकंठशासिभिः कलगीतैर्वपुषा च मोहना ।
ललना मुदिताऽपि जातु सा विषदिग्धासिरिवावभासते ।।(31)

मृदु तिग्ममपि प्रदृश्यते बलवद्दुर्बलजन्तुघातकम् ।
तिलतन्डुलतुल्यमीदृशं जगदुच्चावचवस्तु पूरितम्।।(32)

वृणुते मनुजः प्रियं जनं स वृतोऽप्यन्यमहो विचित्रता ।
न हि कर्तरि कर्मणि स्थिता स्पृहणीयानुगता पवित्रता ।।(33)

इह दोषशतैकदूषिते न हि चैकान्तमनोहरं क्वचित् ।
कृतमल्पफलाय संसृताववविचारापतितेन कर्मणा ।।(34)

वपुषा खिल शीलिना च किं वयसा वार्धकगामि नापि किम् ? ।
क्षणभङ्गुरता विलासिना कृतमेतेन फलेन संसृतेः ।।(35)

इदमीदृशनश्वरं जगत् बिसपत्रे जलबिन्दुवच्चलम् ।
परमात्मनि सम्प्रलीयते क्षणमात्रं किल तेन भासितम्।।(36)

तत एव शिवं च सुन्दरं न हि सत्यं परमात्मनः परम् ।
सकलं विकलं हि जायते परमे शिल्पिनि तु प्रलीयते ।।(37)

In Public domain. Digitization Muthulakshmi Research Academy

अत एव हि यावदीदृशे जगति स्वेन शुभेन कर्मणा ।
मनुजः करणैर्य एधते स विदध्याद्धितमेव देहिनाम् ।।(38)

ऋषयः प्रणिधाय चेतसा तत शिल्पागममापुरञ्चितम् ।
स तु विश्वसुखैकगोचरो यत एतत्सकलं हितं प्रियम् ।।(39)

स्थपतिर्निजशिल्पकर्मणा तनुते विश्वमिमं हितावहम् ।
उपलान्नवरत्नसञ्चयः सिकतायाः कनकं यथा भवेत् ।।(40)

वसुधादिकभूतपञ्चकं जगतां हेतुरहेतुसम्भवम् ।
भरणे धरणे च मारणे प्रथितं सङ्कृतिभिः प्रसाद्यते । (41)

शयनासनपानभोजनैर्भवनप्राङ्गणभूषणादिभिः।
मनुजः सततं च सेव्यते कृतिना संकृतिना हितैषिणा।।(42)

इह चासृजनं जनुष्मतां मनुजानां मरणावसायिनाम् ।
यदि वा सुखमत्र कारणं मतिमान् संकृतिरात्मवान् वशी ।। (43)

गिरितो जलमन्नमुन्मृदःशुचिमद्भ्यो महतश्च खाध्वनिम् ।
अधिगम्य जनाय यच्छता महता किन्नु कृतं न शिल्पिना ।।(44)

अत एव मया यथान्वयं विधिवच्छिल्पमधीतमुत्तमम् ।
महनीयगुणे समर्पितं शशिपुष्पाभरणे कपर्दिनि ।।(45)

In Public domain. Digitization Muthulakshmi Research Academy

अमुना च कपर्दिना भृशं परराजन्यबलैरधृष्यताम् ।
गमितां नवकाकतिश्रियं परितृप्तं हृदयं निशम्य मे ।।(46)

पिरपाल्य गतः स धारणीपतिरन्ध्राधिपतिः प्रतापवान् ।
दुहिता च मृतस्य रुद्रमा महिता शास्ति किलाधुना स्वयम् ।।(47)

तटवन्ति सरांसि पर्वतैः कलमान्नं ददते यथाकृषि ।
निरतास्व पवित्रकर्मणि स्थिरबुध्या जनता हि सप्रजा ।।(48)

मकुटानि विमुच्य मस्तकैः पटुसामन्तमहीभृतो नताः।
प्रकृतिष्वखिलासु दृश्यते पृथुकान्तिश्च विनीतिरुत्तमा ।।49)

अहभूनऋषिप्रवर्तकं मम गोत्रं तु कृतार्थतां गतम् ।
सकलाः प्रचलन्ति दिक्षु यन्मम शिष्याः प्रथिता ऋभूपमाः।।(50)

चरितार्थमभूदिदं तपो वशिनां विश्वसृजां हितैषिणाम् ।
परमेण परेण शिल्पिना कृतमेतत्सकलं यतस्ततः।।(51)

वसुधाधिपतिर्यदादिशत्तदभूत्सर्वमिदं शुभात्मकम् ।
हृदिशल्यमिव प्रबाधते यददृष्ट्वा नृपतिर्मृतिं गतः।।(52)

दुहिता च नृपस्य चापलान्मयि रक्तेत्यधुना हि संश्रुतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रणिधानपरस्य मे मनो विमुखं भृङ्ग इवेह काञ्चनात् ।।(53)

इति तान् सरसांस्तु शास्त्रतः पृथुकल्लोलसमान् हृदिस्थितान् ।
उपसंहरता सरस्वता चिरमेतेन यथा स्थितं तदा ।।(54)

पटुसारमसारमीदृशं स हि संसारमपारमुत्सृजन् ।
निरचेष्टमतिं तपस्वतीं न हि धीराः प्रचलन्ति संसृतौ ।।(55)

सविता घृणिनेव भास्वता निजशिल्पेन तमो विदारयन् ।
जगतो हितमाहितः स्वयं स तु कुत्रापि ययौ निजेच्छया ।। (56)

अथजात्वचिरेण रुद्रमा स्थपतेस्तस्य समानिनीषया ।
रथवाजिगजेन निर्ययौ सहसामन्तसुहृत्पुरोहिता ।।(57)

प्रकृतिष्वखिलासु शक्तिषु त्रिषु सामादिषु चानुरूपता ।
यददृश्यत तत्तु सङ्कृतेः करुणैवेति तदा निनीषया ।।(58)

कतिचिद्दिवसैः समागता शशिरेखामृतवर्धितद्रुमम् ।
सरसीपवनेन शीतलं द्विजगीतैः परिपूरितं वनम् ।।(59)

अथ तत्र विशालसालता रमणीयं कमनीयवेदिकम् ।
महनीय विलासचारुभी रमणीमूर्तिभिरञ्चितालयम् ।।(60)

ललितैर्बहुशिल्पनिर्मितैर्मधुरस्निग्धतरैश्चबन्धुरैः।

In Public domain. Digitization Muthulakshmi Research Academy

गजसिहंशिरोभिरुद्धृतं पटुभिर्दिग्गजमस्तकैरिव ।।(61)

पदभूतशिलाभिरश्चितं पटुजङ्घाकृतिभिर्महोपलैः।
पृथुबाहुभिरुन्मरीचिभिः कटिना शास्त्रदृशा विनिर्मितम् ।।(62)

उदरेण च गर्भरूपिणा कलघण्टोत्थगिरा च संभृतम् ।
द्युतिपुञ्जवता च चक्षुषा श्रवसा नासिकया च शोभितम् ।।(63)

कलशात्मकमस्तकान्वितं ध्वजकेशैः सहितं महाफलम् ।
निजभक्ततमो विभेदिना तनुदीपेन महोज्ज्वलं भृशम् ।।(64)

महिमाभरितात्मरूपिणा नुतलिङ्गेन सनाथमुत्तमम् ।
विगुणस्य हि विश्वरूपिणः सगुणं कल्पितरूपमालयम् ।। (65)

पृथिवीमुखतत्त्वशालिनं भुविनिक्षिप्तसुवर्णमौक्तिकम् ।
महिमान्वितसङ्कृतीन्दुना परिपूतागमवेदिनोद्धृतम् ।।(66)

अभिवीक्ष्य तथाविधालयं विधिवत्तं हिमधामशेखरम् ।
प्रणनाम बहुप्रदक्षिणं शतधात्मानममन्यतोत्थितम् ।।(67)

शुभकर्मणि विश्वकर्मणि स्थिरभक्त्या चरितार्थजन्मनि ।
निजकाकतिधारणीश्रियं तपसा गोप्तरि शिल्पररूपिणा ।।(68)

In Public domain. Digitization Muthulakshmi Research Academy

अभिवीक्षितुकामया तया स गतोऽश्रावि कुतोऽपि कुत्रचित् ।
चपला समशीलसंसृतिं प्रतिनिर्वेदवता हि चेतसा ।।(69)

अपि चाप्तसखीमुखाच्छ्रुतं कथितं संकृतये मिथोऽस्ति यत् ।
ध्रुवमात्मकृतं हि देहिना मिह चाऽमुत्र फलाय कल्पते ।।(70)

अपरा प्रतिमेव रुद्रमा गतचेष्टाहृतचेतना चिरम् ।
अवितर्कितमीदृशं व्रणं कुरुते हृद्गतमर्मवेदनाम् ।।(71)

अयि विश्वसृजां विभूषण त्वयि चेतो मम भक्तिपूरितम् ।
अनवेक्ष्य तु तत्त्वमेतया बत तद्दर्शितमन्यथा तव ।।(72)

प्रथमं त्वयि मे तु चापलाद्धृदयं रागवदेव कोमलम् ।
प्रणिधानपरं ततो मया परिपूतं तददर्शि ते मनः।।(73)

इदमीदृशदुष्फलं तपस्तव निद्रादि विसृज्य यत्कृतम् ।
नवकाकतिराज्यसुस्थितेः प्रथितं कारणमीक्षणामृतम् ।।(74)

सृजनं भरणं च शाखिनो ग्रहणं तस्य फलस्य भोजनम् ।
अपरस्य जनस्य दुर्विधेर्लसनं चित्रविचित्ररूपभाक् ।।(75)

अमुना तव शिल्पकर्मणा यदिदं राष्ट्रमकारि वृद्धिमत् ।
न हि तत्र तवास्ति योग्यता वसतेस्तन्मम बाधते मनः।।(76)

 In Public domain. Digitization Muthulakshmi Research Academy

इत्थं विचिन्त्य बहुधा करुणं महान्ध्र
राज्येन्दिराभरणरक्षणशालिनी सा ।
सर्वेण तत्परिजनेन नमांसि तस्मै
सङ्कर्मणे कृतवती स्वपुरं जगाम ।।(77)

श्रीमत्परमशिवप्रासादासादित हृद्यसाहित्यविद्याविश्वसृढ्वंश्य
सुपर्णसगोत्रमङ्गाम्बाकनाकाचार्यपुत्ररसमयोभयकवित्वधुर्य
वेङ्कटरामाचार्यप्रणीते शिल्पश्रीनाम्निकाव्ये पञ्चमसर्गः।

In Public domain. Digitization Muthulakshmi Research Academy

स्वस्ति। दीर्घायुष्मते शुभाशिषः। कुशलिनो वयम्। आशास्महे पुरोऽभिवृद्धिं भवतः।

अभिप्रायः

श्रीवेङ्कटरामाचार्यः स्निग्धहृदयः कविः शिल्पी च। वर्धिष्णुना तेन प्रणीतं कमनीयं शिल्पश्रीकाव्यमालोकितम्। मनोज्ञवस्तुना कलितमिदमार्षसम्प्रदायमाविष्कुर्वच्छिलस्य ललितकलायाः परमं प्रयोजनं न केवलमाह्लादः, अपि तु जगच्छिल्पिनः परमेश्वरस्य साक्षात्कार इत्यावेदयति। प्रसन्ना कविता तत्र तत्र कालिदासभवभूत्योरनुकरोतीति मोमुद्यामहे कविताशिल्पयोरयं समावेशः हेम्नः परमामोदः।

सूरिरामकोटि शास्त्री

तेनालिपुरम्

प्लवङ्गविजयदशमी

In Public domain. Digitization Muthulakshmi Research Academy

तिलकम्

वर्तमानवैज्ञानिकयुगे स्वतन्त्रभारते प्रजया प्रभुत्वेन च गैर्वाणी वाणी समाद्रियत इति महान् प्रमोदः संस्कृतप्रणयिनां विदुषाम्। अभ्युदयोन्मुखेऽस्मिन्काले आन्ध्रप्रदेशेऽपि श्रीमन्तः पुलिवर्ति शरभाचार्य जटावल्लभुल पुरुषोत्तमशास्त्रि मुल्लपूडि नारायणशास्त्री प्रभृतयः केचन कवीश्वराः संस्कृतकाव्यनिर्माणदक्षा दरीदृश्यन्ते। तेषु श्री दुरिशेटि वेङ्कटरामाचार्यः संस्कृतान्ध्रोभयभाषाकाव्यनिर्माणकुशल उभयकविमित्रं प्रतिभाति। इतः पूर्वमेव कविनानेनान्ध्रभाषायां अनार्कलि अधर्वणाचार्युडु नामकं काव्यद्वयं विरच्य सम्पादितः सर्वान्ध्रसहृदयहृदयाह्लादः। अपि च कालिदासः रघुवंशस्यान्ध्रानुवादोऽपि कविनानेन समुपक्रान्तः। प्रकटितश्च सर्गत्रयात्मकं पुस्तकम्। सर्वोऽप्येषसारस्वतयज्ञः कवेरेतस्य लोकोत्तरप्रतिभाया निदर्शनम्।

वेदप्रसिद्धशिल्पऋषिगोत्रपवित्रः सोऽयं वेङ्कटरामाचार्यशिल्पर्षि-गोत्रपवित्रस्य रामोजु शिल्पाचार्यस्येतिवृत्तं काव्ये निबद्ध्यानन्यादृशेन सरस्वतीसमाराधनेन रसतपस्विनां गौरवपात्रं चकास्ते। प्राचीन शिल्पाचार्येष्वनेके परमर्षय ऋषय ऋषिकल्पाः सिद्धपुरुषा महाप्रभावसम्पन्ना लोकसेवनेनानेनादर्शभूताश्चरितार्थजन्मानो निस्स्वार्थाश्चकासिरे। तेषु आनन्दस्थपति नागश्री पद्मोजु बम्मोजु जक्कणाचार्यादयोऽमोघ-शक्तयश्चरित्रगोचरा एव। केषाञ्चिच्चरित्राणि पवित्राण्यपीर्ष्याकलुषितमतिभिः

In Public domain. Digitization Muthulakshmi Research Academy

स्वार्थपरैर्विकाररूपेण प्रचारितानि। सुधीभिरिदानीं सूक्ष्मेक्षिकया परिशीलिते तन्महनीयं वृत्तं बाढमवभासत एव। जगदाराधनतत्परेषु तेषु महास्थपतिषु रामप्पशिल्पाचार्योन्यतमो रामप्पदेवालयनिर्माता काकतीयगणपतिदेव-सम्मानितः। तमेनं महापुरुषं नायकीकृत्य विरचितं **शिल्पश्रीः** नामकं काव्यमिदं न कस्य प्रमोदाय भवति।

कालिदासाद्यनेकगीर्वाणमहाकविकाव्यरहस्यवेदी कविरिदं काव्यं सकलकाव्यशिल्पाङ्गसम्पन्नमनवद्यं ध्वनिमनोहरं कृत्वा कृतार्थोऽभवदिति सर्वं पद्यं व्यक्तीकरोति। कविताशैलीचास्य शिरीषकुसुमपेशला निरर्गला रसनिर्भरा शय्यासौभाग्यवती विशेषतः पठितृजनहृदयाह्लादकरी जागर्ति। पूतगौतमीप्रशंसया समारब्धे पञ्चसर्गात्मकेऽस्मिन् काव्ये यथावकाशं पुरनदीराजशिल्पिशिल्पाश्रमदेवालयसमरादीनां वर्णनानि रसज्ञमनोभिराममति-सुन्दरं निर्व्यूढानि।

रामोजौ सञ्जातरागाया रुद्राम्बायाश्शिल्पाश्रमागमनसमये कृतं वसन्तवर्णनं तस्या मनोविकारस्योद्दीपकं सदौचित्यं परिपुष्णाति। तथैव शरद्वर्णनमपि देवगिरिराजदण्डयात्रायाः प्रेरकमुचिततरमेव। एवमेव नन्दिवर्णनं युद्धवर्णनं चतुर्थसर्गकृतदेवायतनवर्णनं पञ्चमसर्गान्तस्थितालयपुरुषवर्णनं सर्वाण्यपि वर्णनान्यौचित्यमनोहराणि। काव्यप्रधानभूतरुद्राम्बिकारामोजुपात्रोन्मीलने हृदयावस्थाप्रदर्शने चोदात्तनायक चित्रणोतशक्तिशाली कविः कृतकृत्य एवेति मे मतिः। रामप्पशिल्पाचार्यस्यात्मनिग्रहशक्तिः सनातनशिल्पसंयमिनां

In Public domain. Digitization Muthulakshmi Research Academy

मार्गानुसरण प्रकारः लोकोत्तरशिल्पनिर्माणनैपुण्यं त्रिलिङ्गदेशाराधनदीक्षा च सर्वमस्मिन् काव्ये निरवद्यमतिहृद्यमभिवर्णितम्।

द्वितीयसर्गे सखी शिल्पसम्भाषणे रुद्राम्बिकाध्यानपरोऽहमत्रेति शिल्पवाक्यस्थितः श्लेषो राजकाव्याकांक्षाप्रेरकः। तथापि रामप्पशिल्पिनोक्तं– 'न मेऽस्ति कांक्षा जडजीवनेऽत्र भक्त्या शिवे शिल्पकलानुरक्त्या कृत्वामरां काकतिराज्यलक्ष्मीं कुत्रापि शिल्पेन शुभेन रंस्ये' इति वचनं रुद्राम्बिकाया मनोविकारं शिथिलीचकार। अत एव तया शिल्पसम्राडुदात्तशीलेन महामहिम्ना प्रेम्णा भक्तिपूर्णमेवादर्शि। अपि च सा स्वराष्ट्राभ्युदयाय जीवितसर्वस्वमर्पयति शिल्पिनि गाढभक्तिप्रपन्नैवासीत्।

तदेतद्राज्ञी हृदयमजानती रुद्राम्बिकाप्रियसखी तस्यै अनुक्त्वैव शिल्पिनस्सकाशं गत्वा पञ्चमसर्गे त्वयि शिल्पिनि बद्धभावना मम राज्ञी चरितार्थजन्मनि इति शिल्पिने निवेदितवती। एतत्सखीवचनं च तस्या राजभक्तिमेव व्यञ्जयत् काव्यस्यात्मभूतमौचित्यं पुष्णात्येव।

स्थपतिस्तु सखीवचनं श्रुत्वा संसारस्यासारतां परमेश्वर– प्राप्तेस्सारतां तत्प्राप्त्युपायभूत दैवमानुषशिल्पप्रयोजनं राजपुत्र्या यौवनसमुद्भूत चपलतां चाकलय्य प्रणिधानपरः कुत्रापि गतः रुद्रमा च शिल्पिहृदयं लक्ष्यं च विज्ञाय आत्मानं निगृह्य शिल्पिनो देशाराधनदीक्षायै मुदितवती तस्मै नमांसि कृत्वा सकरुणं गत्वा च पुरं राज्यरक्षावती बभूव। इत्थं काकतिराज्यरक्षायै दीक्षितो महास्थपतिरुत्तममानुषधर्माननुष्ठाय जगदादर्शभूतश्चिरञ्जीवी चकासे। तन्निर्मितो

In Public domain. Digitization Muthulakshmi Research Academy

रामप्प देवालयोऽद्यापि कलाभिज्ञानां भगवद्भक्तानां चाराधनीयो जागर्ति। रामप्पकृतेन शाम्भवेन स्थापत्येन काकतीयान्ध्रविषयस्सर्वोऽपि माहेश्वरस्समजनि।

काव्येऽस्मिन् दैवादृते पौरुषमात्मशक्त्या न हि प्रतिष्ठेत फलं लभेत, स्त्रीदृष्टपूर्वाप्यपरेवभातिप्रत्यग्रभूषाम्बरधारणेन, कृतान्तपाशोपहतात्मबुद्धेराशीविषेरज्जुरिति भ्रमिहि, आत्मवत्ता महात्मनां सन्निहिता सदैव, महान्तः स्युर्निग्रहानुग्रहयोः समर्थाः सिकता तैलवती कथन्नु किम्? न हि धीराः प्रचलन्ति संसृतौ इत्यादयोऽर्थान्तरन्यासा नित्यव्यवहारोपयोग्याः काव्यस्य महिमानं बहुधा व्यञ्जयन्ति। तथैवोपमारुपकोत्प्रेक्षाद्यलङ्कारा औचित्यशोभिता निबद्धाः। तत्तत्सर्गेषूपयुक्तानि वृत्तान्यपि कथाविषयानुरूपाणि सहृदयसम्मतान्येव। पञ्चमसर्गे प्रयुक्तं वियोगिनीवृत्तं रुद्राम्बिकानुरागस्य निष्फलतां शिल्पिनो विषयवितृष्णतां शान्तिपरतां च व्यनक्ति। एवं काव्येऽस्मिन् अभिनन्दनीयगुणा बहवस्सन्ति। ते च व्याख्यानसापेक्षा न प्रस्तावनामात्रगोचराः।

किं बहुना काव्येऽस्मिन्निदं मनोहरं नेदमिति वक्तुमशक्यम्। सर्वाङ्गसुन्दरमिदं कवयितुर्महाकविपदगौरवमावहतीत्यत्र न कश्चित्सन्देहः। तदेतत्सर्वं काव्यतत्त्वज्ञसहृदयैकवेद्यमिति विरमाम विस्तरात्।

एतावता कृतार्थस्य श्रीमद्वेङ्कटरामाचार्यस्य लेखनी उत्तरोत्तरं मनोज्ञतराणि काव्यनाटकादीनि प्रसविष्यतीति काव्यतत्वज्ञविदां विश्वासः।

In Public domain. Digitization Muthulakshmi Research Academy

इदानीन्तने लोके संस्कृतकाव्यनिर्मातार एव विरलाः। यदि केचित्सन्ति तेषां काव्येषु बद्धादराः तत्कृतिपतित्वेन आत्मानं अलङ्कुर्वाणा अतिविरलाः। एवं स्थिते कवेरेतस्य काव्यस्य भर्ता सद्गुणसम्पन्नः शिष्यः सम्प्राप्तः। श्रीशोभनाचलाभिधानोऽयं न केवलं शिष्यभूतः किन्तु कव्युक्तदिशा शिष्यः मित्रं मातृवत्कष्टसमये रक्षिता च चकास्तीति हेम्नः परमामोद ईदृश कृतिनायकलाभः काव्यस्य। महोदारश्शीलशाली शिल्पश्रीकाव्यस्य भर्ता विद्वदामोजभाजनं कार्यं निर्वर्त्य सर्वेषामपि संस्कृतप्रणयिनाम् अस्मादृशामाशीर्वादायाभिनन्दनाय च पात्री भवति। अन्येऽपि सत्पुरुषा वदान्याः शोभनाचलसुकृतिप्रदर्शितमार्गमनुसृत्य संस्कृतभाषा पोषकाः काव्यप्रकाशकाः सरस्वतीविनोदं कुर्वन्त्विति अभिलषामः। श्रीशोभंनाचलसुकृतिना निर्व्यूढानि यानि सत्कार्याणि तेष्विदमेवैदं प्राथम्येन सुधीस्तुत्यमानं विराजते।

इत्थम्

प्रत्नगोत्रो वीरराघवाचार्यः

आन्ध्रशिल्पकलापरिषत्कार्यदर्शी

तेनालि

प्लवङ्गविजयपञ्चमी

In Public domain. Digitization Muthulakshmi Research Academy

स्थापना

प्रियसोदरश्चिरञ्जीवी श्रीदुरिशेटि वेङ्कटरामाचार्यः साहित्यविद्याप्रवीणो विद्वत्कविताभिरामो महोदारमनीषयोभयभाषाप्रौढिमत्काव्यशिल्पे पारग-स्सम्प्रदायसंस्कृतिसमादरणेन समाचरणेन च मधुरोदारसुकुमारभावुकः सत्यव्रतः शिवाराधकस्सौन्दर्यस्रष्टा च। इतः पूर्वमेव प्रान्तीयायामान्ध्रभाषायां द्वित्राणि काव्यानि हयग्रीवशतकमिति संस्कृतकृतिं च निर्माय कृतीसुकृती चायं शिल्पश्रीरिति मधुरं गीर्वाणकाव्यं सहृदयलोकायोपहारी करोति।

काकतीयरुद्राम्बाराज्यारम्भकालस्य रामप्पगुडि इति प्रसिद्ध-माहेश्वरालयनिर्माणस्य च सम्बन्धीदमिति वृत्तम्। तदानीन्तनस्तरुणशिल्पी रामोजुरात्मटङ्कविनिस्सृतां राशीभूतां शिल्पविभूतिं द्रष्टुमागतां रुद्रम्बा वीक्ष्य तत्सौन्दर्यसमाकृष्टः तदानन्दमयेन भावेनालयकुड्येषु परम्परया निर्मितासु स्त्रीमूर्तिषु तस्या रूपरेखा एव ववर्ष। पुपोषचात्मनाधिगताननल्पशिल्प-नृत्यकलाशास्त्रपाण्डित्य शरज्ज्योत्स्नामृततरङ्गानुत्तुङ्गान्।

युवराज्ञी सा त्वपि न खलु स्त्रीप्रकृतेरतीता। तथा च तस्य शिल्पिनो बहिरन्तस्सौन्दर्यरेखाभ्यामत्यन्तं समाकृष्टा बभूव। राज्ञीवासनियमस्तु प्रणयं रुरोध दूरीचकार च। तथापि सा तत्प्रभावेन सर्वसमग्रं शिल्पिनो वशवर्तिन्यभूत्।

किन्तु को वा जानातु कुसुमकोमलं तस्या मन आन्तर्यं च। को वा नु खलु करोतु तस्या ज्वरनिदानम्। तापो दुस्सहो बभूव। परिणाम च चिकित्सातीता व्याधिः। कथञ्चित्सचिवानुमता सपरिवार मालयप्राङ्गणमेव निर्जगाम।

In Public domain. Digitization Muthulakshmi Research Academy

हन्त भोः! तथाविधमात्मानं समाकर्षन्ती सा महाराज्ञी किल. न खलु समीचीनः असमानयोर्मध्ये सङ्गमः। असामान्योऽयं शिल्पी रामोजुः। औचित्यगुणग्राही क्षेमेन्द्रः अनौचित्यप्रवृत्तिं रसभङ्गकारणं मन्यमान आनन्दवर्धनो बभूव।

शरवेगं निर्मायालयमेकाग्रतया बभूव कृती सुकृती च। शशासात्मानं सत्त्वरेन्द्रियविकारात्। ददर्शात्मोल्लिखितं माहेश्वरमालयं तदेकध्यानम्। वियति दगद्धगायमानं विराजमानमालयशिखरञ्च। अभूत् परवशः लब्धानन्दवल्ली वृष्टा चामृतवृष्टिः।

अत्रान्तरे आगतैव महाराज्ञी आलयस्य पुरतो लिङ्गरूपिणः परमशिवस्य समक्षं शिल्पिनो देहः पिण्डीभूय स्थितः। विवृतश्च ब्रह्मरन्ध्रद्वारबन्धः। महाराज्ञी प्रतिमेव स्तम्बिता किञ्चिदाश्वस्य समीपं दुःखदुःखेनोपविश्य उन्नमय्य सप्रणयमस्य शिरोऽङ्कमारोप्य तरुणपल्लवकोमलरागरञ्जितेन करेणास्य कोमलं देहं स्पृशन्ती अनिमिषलोचनाभ्यां मुखं तस्य ददर्श।

अत्रान्तरे निद्रालुपुण्डरीकाभ्यामाविर्बभूव शिल्पिनो नेत्राभ्यामुन्मीलनरेखा। उभयोर्लोचने सञ्चग्मतुः परस्परम्। पुनः शिल्पाचार्यस्य मिमीलतुर्लोचने साकं राज्ञीनेत्राभ्याम्। न पुनरुनिन्मीलतुः रामोजुनेत्रे राज्ञीनेत्रे तु कथञ्चिदुन्मीलतुः।

इयं परम्परागता चारित्रका श्रुतिः शासनाद्युपकरणोपजीविनां चारित्रकाणामनादरणीया रसार्द्रहृदयेन कविराजशेखरेणानर्घकाव्यवस्तुरूपेण स्वीकृता घनश्रुतिः। अद्य एकशिलापुरीप्रान्ते निवसन्तः श्रीरामोजुवंश्याः शिल्पिब्राह्मणास्तद्वश्याः किल।

In Public domain. Digitization Muthulakshmi Research Academy

कदाचिदियं गाथा श्रीपन्दिरिमल्लिकार्जुनरायसम्पादितायां किन्नेरपत्रिकायां मया दृष्टा दर्शिता चाचार्याय सपद्येव सूचिता च काव्यावतरणाय। आचार्येणापि गाढादरेण गृहीता।

महाकवेः शिल्पवंश्यस्याधर्वणस्य भारतदाहगाथामान्ध्रवाग्देवी कण्ठाभरणं मधुरं काव्यं निर्माय कृतहस्तोऽयमाचार्यो महाशिल्पिनो रामप्पस्य रसमयीं शिल्पगाथां यावन्न प्राबध्नात् तावन्नातृप्यत। एष एवास्य काव्यावतरणस्य हेतु। सन्ति लोकेऽनेकत्र संस्कृतसाहित्यनिष्णाताः। परन्तु तद्दैर्वाणवाण्यां काव्यनिर्माणचणा विरला एव। तादृशकवय आन्ध्रेषु अतिविरलाः। चारित्रिकांशं तत्रापि शिल्पगाथाविशेषमितिवृत्तं स्वीकृत्य कृतार्था मनीषिणो विरलातिविरलाः।

चारित्रिकं वस्तु सरससाहित्यमार्गे पुटपाकसमुन्नीतं सत् रूपान्तरं व्रजति। लौकिकान्मालिन्यात् क्षालितं भवति। रसमयकविहृदयभावितं सत् अवतरति सुन्दरमुज्ज्वलश्च काव्यम्। व्यासकृतमहेतिहासभासुरं शाकुन्तलमुपाख्यानं कालिदासलेखिन्यां नाटकीयतां प्राप्याभूत्किल अभिज्ञानशाकुन्तलम्। जनतापारं पर्याधिगता रामोजुगाथाप्याचार्यलेखिन्यास्समावतरच्छिल्पश्रीः।

जगच्छिल्पिनं भगवन्तं विश्वकर्माणं सम्प्रार्थ्य प्रशस्य च शिल्पिनः शिल्पमवतरति शिल्पश्रीकाव्ये सन्निवेशकल्पं महनीयं मनोहरं चाभूत्। रामोजुर्यदृच्छया सुन्दरशिल्पाकृतिं निर्ममे। शिल्पाश्रममागता युवराज्ञी आत्माकृतेः प्रतिकृतिं तत्र पश्यन्ती विस्मयानन्दावनुप्राप। दृष्ट्वा च विसिष्मियेऽतीव रामोजुरात्मकृतेः प्रतिकृतिम्।

ततः काकति गणपतिदेवेन नियुक्तो रामोजुरीश्वरालयनिर्माणाय दीक्षितो बभूव। शिल्पिनमुद्दिश्योदियाय क्रमक्रमं रुद्रमायामनुरागः। शिल्पिनोल्लिखिते

In Public domain. Digitization Muthulakshmi Research Academy

नन्दिनि कान्तामूर्तिषु च शिल्पवैभवदर्शनेन शिल्पिनस्समाधानवचनेन प्रवृद्धानुरक्तिर्भक्तिरूपेण परिणनाम।

युवराज्ञी महाराज्ञी बभूव। राज्याभिषिक्ता महाराज्ञी रुद्रमा राज्यराक्षणशत्रुपराजयप्राभवानां कारणं शिल्पिशिल्पप्रतिष्ठितस्य लिङ्गपीठस्थस्य यन्त्रस्य महिमा शिल्पिप्रभावश्चेति निरचेष्ट।

प्रथममनुरक्तापि शिल्पिनि तस्य न मेऽस्ति कांक्षा जडजीवनेऽत्र इत्याद्यपूर्वप्रणिधानप्रधानसमाधानेन परिणतभक्तिविलसितां महाराज्ञीं प्राकृतजनसामान्यप्रणयवतीं मत्वानुक्त्वैव तस्यै जगाम शिल्पिनस्सकाशमात्मसखी।

सङ्कृतिस्तु चकितो बभूव सखीमुखाच्छ्रुत्वा राज्ञीप्रणयसन्देशम्। ततोऽनेकधा निर्विण्णो रामोजुस्संसारस्यासारताम् आत्मनः कृतार्थतां चाकलय्य कुत्राप्यज्ञातं प्रतस्थे। महाराज्ञी तु सहसामन्तसुहृत्पुरोहिता शिल्पिनो निवीषया वनमागता। निर्गुणस्य परमात्मनः सगुणरूपमालयं दृष्ट्वा खण्डेन्दुशेखरं प्रणम्य बुद्ध्वा च शिल्पिनः अज्ञातप्रस्थानं करुणं बहुधा विलप्य दुःखसन्तप्ता जगाम स्वपुरीमेकशिलाम्।

काव्येऽत्र कविराचार्यः शिल्पाचार्यपात्रं विशिष्टमार्गमनुसृत्यापुषत्। चारित्रकेतिवृत्ते स्वयं विगतजीवो रामोजुरत्र काव्ये कुत्रापि जगाम प्रस्थितः। सन्निवेशोऽयं परम्परागतशिल्पाचार्याणां जीवननैर्मल्याय प्रणिधानप्रधाननैतिकमहत्त्वाय च दृष्टान्तः। महाराज्ञी रुद्राम्बापि भक्तिभावविलसितेन चेतसा प्रक्षालितलौकिकविकारकालुष्या स्फटिकमणीव चकास्ति। श्रृङ्गारभासात् प्रादुर्भूतः शान्तोऽत्र रसः सर्वाङ्गीणतया शोभते।

In Public domain. Digitization Muthulakshmi Research Academy

जगच्छिल्पिनि परमात्मनि निहितचेतसां मानवानां लोकहितदीक्षैव कार्येति कर्तव्यकरणमुद्धोऽधयदिदं काव्यं कान्तासम्मिततयोपदेशयुजे इति आचार्यमम्मटवचनस्य विश्वश्रेयः काव्यमिति नन्नयभट्टारकसूक्तेश्च प्रबलमुदाहरणं भवति।

अस्यां शताब्द्यां परविषयभाषाकलुषिते सङ्कीर्णेऽस्मिन् समये एतादृशस्यानर्घकाव्यस्याविर्भावः तत्रापि गैर्वाणवाण्यामिति हेम्नः परमामोदः। स्वस्ति चरितार्थजन्मने रसहृदयायाचार्यायायुष्मतेऽस्मै सौपर्णाय।

माधवाचार्यः वैश्वज्ञः

प्रांशुपालः,
धर्म अप्पराव् कालेज्
नूजिवीडु

In Public domain. Digitization Muthulakshmi Research Academy

शुभाकांक्षा

श्रीमाता शिल्पश्रीकेण सौपर्णेन श्रीवेङ्कटरामाचार्येण धीमता सता यदिदं नव्यं काव्यं व्यरचि तस्यास्य सम्भावनेन ममाभून्मनसि नाद्यापि संस्कृतकाव्यरचनाशक्तिर्लुप्तेति प्रादेशिककाव्येषु सर्वत्र चरित्रानुगतं वस्तुभावोद्यमानुकूलतया स्वीकृतं भाषानिबद्धं तादृशं पर्याप्तप्रसरमिति प्रसिद्धम्। अमरगवीनिबद्धमिदं संस्कृतहृदयामोदमाधास्यतीत्यहं विश्वसिमि। विद्याशालासु पाठ्यतया निर्णीतमिदं सर्वेषां भावुकपाठकानां मादृशानामिवालुप्तं विश्वासमुत्पादयतु। संस्कृतभाषानिबद्धानां काव्यानां पठने पाठने सुकृतश्रद्धः सोऽयं कविः तदनुसन्धानपर इति सर्वत्र स्पष्टं ज्ञायते। रचनाभ्यासमतिरयं मधुरां प्रसन्नां रचनामादृत्य स्वस्पन्दविशिष्टतां द्योतयति। आहार्याङ्गिकवाचिक-सात्त्विकस्वलक्षणं साहित्यात्मकं नाट्यं भावयतामत्रापि तत्त्वसम्भावनं सुकरम्। रसादृते मनसि न कश्चनार्थ इति भारतीयां सूक्तिं शिल्पश्रीके सम्भाव्य समुचितविभावादिसंवादिभावप्रतिपादनेन कवेरस्य रसादृतमतिता सम्भाव्यास्तु। भाव एव रसो रस एव भाव इतीदं वचः यथा गृहीतं भावदीपन-परेऽस्मिन्सम्भाव्यमस्तु। सहृदयैस्साधारण्येन सम्भाव्यमानमनोहरमिदं देश-कालातीतमवैयक्तिकं भावसंवादं सम्पादयितुं प्रभविष्यति। अस्तु।

जम्मलमडकमाधवरामशर्मा

संस्कृतकलाशालाध्यापकःअभिनवभारती

गुण्टूर्

प्लवङ्गमार्गशीर्षकृष्णपञ्चमी

In Public domain. Digitization Muthulakshmi Research Academy

कृतिकृद्धन्यः कृतार्था वयम्

काव्यं वर्णयति प्रशस्तमतुलं भव्यान्ध्रशिल्पश्रियं
भाषा च प्रथयत्यमोघरचना वैदग्ध्यमेतत्कवेः
भावं स्पष्टतया व्यनक्ति कविताशिल्पं सुसूक्ष्मं कृतौ
सर्वं सङ्गतमत्र येन कृतिकृद्धन्यः कृतार्था वयम्।।

केशिराजु वेङ्कट नृसिंहप्परायः

कोव्वूरु
प्लवङ्गाश्वीयुजकृष्णद्वितीया

In Public domain. Digitization Muthulakshmi Research Academy

ISBN No: In Public domain. Digitization Muthulakshmi Research Academy



संस्कृतपरिषद्

आदर्शशोधसंस्था

उस्मानिया विश्वविद्यालयः

हैदराबाद् ५०० ००७